❀ श्रीमते रामानुजाय नमः ❀

परन्द रहस्यम्


प्रकाशक—

रामदयाल सोमानी

वम्बई

सं० २०२१ वि० सन् १९६५ ई०

।। श्रीमते रामानुजाय नमः ।।



श्रीमद् आच्यानपिल्लै विरचित-

❋ परन्द रहस्यम् ❋

सम्पादक—

श्रीनिवासाचार्यजी विद्वान, प्रयाग

प्रकाशक—

जगद्गुरु प्र० भ० स्वामी अनन्ताचार्यजी महाराज

के चरणाश्रित

रामदयाल सोमानी

सम्वत २०२१

सन् १९६४

❀ श्रीमते रामानुजाय नमः ❀

❀ भूमिका ❀

अखिलब्रह्माण्डनायकस्य निखिलहेयप्रत्यनीककल्याणगुणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपस्य स्वेच्छाविलासमात्रेण जगदुत्पत्तिस्थितिक्षपणक्षमस्य भगवतः श्रीमन्नारायणस्य त्रिगुणात्मिकया मायया वशीभूताः अनन्तचेतनाः घोरसंसाराब्धौ श्वशूकरशृगालकीटपतंगादि क्षुद्रयोनिषु जन्ममरणादिरूपानेकानि दुःखानि भुञ्जानाः दरीदृश्यन्ते। नित्यानन्दाद्यनेकगुणैः परिपूर्णाः अपिस्वकृतकर्मात्यन्तवश्यतयास्मिन् प्रकृतिमण्डले पतित्वा स्वकीयदिव्यस्वरूपं विस्मृतवन्तः। येन च सांसारिक क्षुद्रसुखब्रह्मादिक्षुद्रैश्वर्यप्राप्तिरेवपुरुषार्थ इति मत्वा तत्प्राप्तये च अनेकोपायांश्च कुर्वन्ति। तैरुपायैरत्यन्तविस्मृतस्वरूपत्वात् कुंभीपाक रौरवादि नरकेषु निस्सीमदुःखभुक्त्वा पुनश्च चतुरशीतिलक्षयोनिषु पतित्वा अपारदुःखसागरे निमज्जन्ति। स्वेच्छानुवृत्तिस्वरूपस्थितिप्रवृत्तिभेदैः नित्यसूरिभिरनवरतपरिचर्यमाणचरणकमलः श्रीमन्नारायणः तेषामिव लीलाविभूतिस्थानामपि स्वानुभवस्यप्राप्तुं

योग्यत्वेऽपि तद्‌धानिं दृष्ट्वा परदुःखासहिष्णुत्वरूप दया-गुणभरितत्वात् अतिव्याकुलस्तदुज्जीवनाशया प्रलये उपकरण कलेवरविधुराणांमचिद्‌विशिष्टानां अतएव भोगमोक्ष-शून्यानां तद्दशायां दयमानमनाः स्वचरणकमलसमाश्रय-णोपकरणानि करणकलेवराणि दत्वा ज्ञानविकाशंप्रवृत्ति-निवृत्तिशक्तिंचोत्पाद्य ज्ञानकार्यंत्याज्योपादेयपरिकरतया "ज्ञानप्रदीपमिव कारुणिको ददाति" इत्युक्तप्रकारेण वेद-प्रदानमकरोत । अनन्तरं मन्वादीनामन्तर्यामितया स्थित्वा चेतनानां विशिष्टवेषविषयं शास्त्रं प्रकाशयामास । तादृश वेदाद्यभ्यासस्यानेकयोग्यतासापेक्षत्वात् चिरकालसाध्यत्वाच्च दुष्करत्व विचार्य तादृशयोग्यतानिरपेक्षतादिना सुकरांचेतन निष्कृष्टवेषविषयां समस्तवेदसारभूतां श्रीमदष्टाक्षर ब्रह्मवि-द्यांस्वयमेवशिष्याचार्यरूपतया नरनारायणरूपेण श्रीवदरि-काश्रमेऽवतीर्य प्रकाशयामास । तथा च पुरामन्त्रद्वयं ब्रह्मन् विष्णुलोके महापुरे इत्याद्युक्तरीत्या विष्णुलोकेस्थित्वा स्वरूपयाथात्म्यानुरूपोपायोपेयप्रतिपादनपरं द्वयसंज्ञक-मन्त्ररत्नं लक्ष्म्यै उपदिदेश । ततः द्वापरयुगे स्वमनोहरद-र्शनादिना संसाराब्धेः चेतनान् संतारणाय देवकीपुत्रतया श्रीकृष्णरूपेणावतीर्य प्रपन्नं पार्थंमुद्दिश्य शरणवरणोचितान् वात्सल्यस्वामित्वसौशील्यसौलभ्यादिगुणान् प्रकाशयन् स्व

रूपयाथात्म्यानुरूपपरमपुरुषार्थप्रतिपादनपरं चरमश्लोकश्चाद्योतिष्ट । एवं प्रवर्तितेऽपि मुमुक्षूणां श्रीवैष्णवानां परमनुसन्धेये मन्त्रत्रयेऽनन्तकल्याणगुणगणमहोदधिः परमदयालुः भगवान् श्रीमन्नारायणः आचार्यरूपेणपुनःपुनरवतीर्य स्वचरणनलिनशरणागतिपूर्वकं मन्त्रत्रयं तस्यार्थश्च शिष्येभ्यः उपदेशयामासोपदिशति च । उक्तार्थे श्रीपरमाप्तस्यश्रीवेदान्तदेशिकस्वामिनः सूक्तिः प्रमाणरूपेणराजते। तथाहि — अध्यामीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासनादाचार्यादिहदेवतां समधिकामन्यान्न मन्यामहे । यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकाम् । मग्नानां भविनाम्भवार्णवसमुत्तराय नारायणः । एवञ्चेतेषांभगवदवतारभूतानांआचार्याणाम्मध्ये श्रीवैष्णवकुलाब्धौ चन्द्र इव विराजतेऽस्य श्रीपरन्दरहस्यनामकदिव्यग्रन्थस्यकर्ता श्रीकृष्णसमाह्वय सूरिः। श्रीयामुनमुनितनूजैरेभिरयंग्रन्थः द्रविडभाषायां व्यरचि । ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकं कैवल्यं भगवन्तं च मन्त्रोऽयं साधयिष्यति । किं तत्र बहुभिर्मन्त्रैः किं तत्र बहुभिर्व्रतैः । नमोनारायणायेतिमन्त्रः सर्वार्थसाधकः । ऋचो यजूंषिसामानि तथैवाथर्वणानि च । सर्वमष्टाक्षरान्तस्थंयच्चान्यदपिवाङ्मयम् । इत्यादि प्रमाणानुसारेण सर्वपुरुषार्थप्रात्येकसाधनत्वात् .

नारायणाय विद्महे इत्यादि विष्णुगायत्र्याम्प्रथमोपात्तत्वात् व्याप्यपदार्थव्यापनप्रकारव्याप्तिफलव्यापकगुणानां च प्रतिपादकत्वात्, दिव्यसूरिनाथयामुनपरांकुशैरत्यन्तादृतत्वाच्च-अस्य व्यापक मन्त्रेभ्यो त्रिभ्योऽप्यधिकं महत्वमस्ति। ग्रन्थेऽस्मिन् एतादृश महत्वशालिमन्त्रराजस्यतद्व्याख्यानरूपस्य द्वयाख्यमन्त्ररत्नस्य तद्व्याख्यानात्मकस्य चरममंत्रस्य चार्थाः यथा प्रतिपादिताः तथान्यत्र दृष्टिपथे न समायाति। अत्र शास्त्रप्रमाणपुरस्सरव्याख्यां कुर्वन्तः आचार्यवर्याः वाह्यकुदृष्टीनां मतानां निरसनमत्यन्तकौशलेन शास्त्रसम्मततर्कैरकार्षुः। अनन्यार्हशेषत्वानन्यशरणत्वानन्यभोग्यत्वरूपाकारत्रयस्य स्वस्वरूपपरस्वरूपोपायपुरुषार्थविरोधिस्वरूपाणांच प्रतिपादनमत्यन्तसुगमरूपेण कृतवन्तः। किम्बहुना बुद्धिमन्तः मुमुक्षवश्श्रीवैष्णवाः इमं पठित्वा गुरुमुखाच्छ्रुत्वा चास्य महत्वं स्वयमेव ज्ञास्यन्ति। परममहत्वपरिपूर्णस्यास्यग्रन्थस्य द्रविडभाषामयत्वात् तद्भाषानभिज्ञानामौत्तराहश्रीवैष्णवानां आत्मकल्याणसिद्धि कामयमानैः तत्र भवाद्भिः अनन्त श्रीविभूषित श्रीगोवर्धनपीठाधिपश्रीरङ्गदेशिकस्वामिपादैरत्यन्तसरलसंस्कृत-भाषायां प्रतिपदानुवादोऽकारि। आचार्यप्रवरैः कीर्तिमूर्तिभिरयमेतादृशात्यन्तहृदयग्राहिशब्दैः व्यरचि। यदल्पाधीतसंस्कृत-

भाषाणामपि मुमुक्षूणां मन्त्रार्थमधिजिगमिषतां आञ्जस्येन मन्त्रार्थज्ञानं भविष्यतीत्यत्र नहि सन्देहलेशोऽपि। पूर्वाचार्यैरनुगृहीतस्याप्येतावत्कालमप्रकाशितस्य चास्य मन्त्रार्थप्रतिपादकग्रन्थशिरोमणेः प्रकाशनमत्यावश्यकमिति मनसि निधाय श्रीअष्टोत्तरशतसहस्रश्रीसमलंकृतानां जगद्गुरु श्रीप्रतिवादिभयङ्करानन्ताचार्य स्वामिपादानां परमकृपापात्रेण बहुश्रुतमन्त्रार्थ चरमोपायनिष्ठेन परमभागवतेन "श्री रामदयाल सोमानी" श्रेष्ठिमहोदयेनात्यन्तोत्साहयुक्तेनास्यप्रकाशनं स्ववर्णानुकूलवृत्त्यर्जितद्रव्यैरकारि। भगवद्भागवताचार्य कैङ्कर्यैकप्रयोजनेनानेन श्रीसम्प्रदायं प्रतिकृतैषा सेवा चिरस्मरणीयास्ति।

ग्रन्थेऽस्मिन्नशुद्धि निरासाय कृतेऽपि सुतरामुद्योगे चित्तचाञ्चल्यात् करणापाटवादिदोषात् इदानीमप्यशुद्धयोऽवशिष्टा भवेयुरिति संभावयामः। आशास्महे च परमदयादिगुणभरिताः विद्वांसः श्रीवैष्णवाः तदर्थं क्षमां विधाय सूचयिष्यन्तीतियतोऽग्रिमे संस्करणेऽशुद्धिनिरासाय प्रयतिष्यामह इति निवेदयति —

कार्तिक शुक्ल पूर्णमासी सम्वत् २०२१

वैष्णवानामनुचरः
श्रीनिवासाचार्यः विद्वान्
श्रीवैष्णवाश्रम, दारागंज,
प्रयागस्थः

❀ श्रीमते रामानुजाय नमः ❀

॥ श्रीश्रियैनमः ॥

❀ परन्द रहस्य ❀

श्रीमत्कृष्ण समाह्वाय नमो यामुनमूनवे ।
यत्कटाक्षणलक्ष्याणां सुलभः श्रीधरस्सदा ॥१॥

निर्हेतुकभगवत्प्रसादे वेदवाह्यसांख्यादिदर्शनेषु विमुखस्य निर्दोषप्रामाण्ये वेदे प्रविश्य तत्र बंधकस्वर्गादि क्षुद्रपुरुषार्थतत्साधनादिप्रतिपादकं पूर्वकाण्डं प्रयोजनाभावात् त्यक्त्वा ज्ञानभागे प्रविश्य तत्राप्यैश्वर्यापेक्षयानित्यत्वादिभिः किञ्चिदधिक कैवल्यं तत्साधनं च विहायैश्वर्यकैवल्यादिविलक्षणे स्वरूपानुरूपे परमपुरुषार्थलक्षणमोक्षे रुचिमतस्तत्तत्साधनकर्मज्ञानादिदुष्करत्वाद्यनुसंधानेननिष्कृष्टस्वरूपानुरूपोपायरुचेरधिकारिणोऽभिमतानुरूपो पायोपेयौ प्रत्येकं ज्ञापकरहस्यत्रयं चावश्यं ज्ञातव्यम् । प्रत्येकमुपायोपेयज्ञापकंचेत्तत्रैकस्य ज्ञानगोचरतावश्यकतया त्रयाणां ज्ञातव्यत्वं किमर्थमिति चेद्बुभुत्सोरेकस्मिन्नर्थे निष्ठार्थमनुरूपानेकप्रमाणानामपेक्षितत्वात् तत्तत्प्रामाण्य भेदेन त्रितयमपिज्ञातव्यं भवति । तत्रमूलमन्त्रः, ऋचो-

यजूंषि सामानि तथैवाथर्वणानि च। 'सर्वमष्टाक्षरान्तस्थं, यच्चान्यदपि वाङ्मयम् ॥ इति सकलशास्त्रसंग्रहत्वाच्छास्त्रमुखेन प्रमाणं भवति। अयं मन्त्रः शास्त्रद्वारा प्रमाणं चेच्छास्त्रेष्वेतदुपायोपेयप्रतिपादकवाक्यानां प्रामाण्यसंभवे अस्यैव निर्बंधेकोहेतुरिति चेत्तद्वाक्यैरर्थनिर्णयकरणेज्ञानि पूर्वभागे चेत् सकलशाखाप्रत्ययन्यायसंचारेणार्थनिर्णयः कार्यः। तत्र सकलशाखाप्रत्ययन्यायो नाम, एकस्मिन् वाक्ये एकोर्थउक्तश्चेत्तदंगोपांगादीनां साक्षाद्ज्ञातुं शाखान्तरेषु सर्वेषु सश्राव्यं तत्रोक्तार्थेषु ज्ञानं च संपाद्यतत्तदर्थानामन्योन्यविरोधपरिहारं कृत्वा स्वाभिमतांग्युपयुक्तघटनं तदल्पशक्तिकेनकर्तुमशक्यम्। तथैव सकलवेदान्तप्रत्ययन्यायो नाम, एकस्मिन्वेदान्ते एकेनवाक्येनैकोऽर्थः प्रतिपन्नश्चेदितरवेदान्तेष्वपि सश्राव्यं तत्रोक्तानामन्योन्यविरोधो यथा न भवेत्तथा विषयविभागं कृत्वा स्वाभिमतार्थैस्तदुपयुक्तानां घटनं एवमेतन्न्यायद्वयस्यापेक्षितत्वेन तस्य दुष्करत्वात्, एकेन वाक्येनार्थनिर्णयस्यकर्तुमशक्यत्वात्। ऋचो यजूंषि सामानि, इत्याद्युक्तप्रकारेण सकलशास्त्रसारतया प्रमाणसिद्धे सर्वैरप्यविगीतं स्वीकृतेऽस्मिन्न् मंत्रउक्तस्यार्थस्य तथा क्लेशसाध्यतायाअभावादयमेवनिरपेक्षप्रमाणं स्यात्। एवं सुदृढं श्रुति सिद्धत्वे कस्यचिदुपा-

देयं यदा भवति, तदा शिष्टाचारगोचरत्वमावश्यकमिति ।

यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः ।
यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः ॥

इत्यादिषु शिष्यस्य कर्तव्यविधायकप्रदेशेषु यथा ते तेष्ववर्तंत तथा त्वमपि तत्र वर्तेथाः ते यथा वर्तिष्यन्ते तथा त्वमपि वर्तेथाः इत्युक्तत्वादष्टकायां पशुविशसनस्य विशिष्टपरिग्रहाभावेन स्वरूपनाशकत्वात् शिष्टाचारः प्रमाणमिति शिष्टाचारस्यैव प्रधानप्रमाणतयामीमांसकैरुक्तत्वेन, सकलशास्त्रसंग्रहभूत श्रीमन्त्रोक्तार्थे शिष्टाचारस्यापेक्षितत्वात् अस्यार्थस्य शिष्टाचार द्वारा प्रमाणं भवति । द्वये आचार्यैश्च परिगृहीतस्यार्थस्यशरण्याभिमतत्वप्रकाशको भवति । चरमश्लोकः शरण्यानुमतिद्वारा प्रमाणं भवति । शास्त्रसिद्धः शिष्टाचारसिद्धश्चार्थः शरण्याभिमतः खलु तिष्ठति, तर्हि तदभिमतत्वस्य प्रत्येकमेकं प्रमाणमपेक्षितं किमितिचेत्, ज्योतिष्टोमेन स्वर्गकामो यजेतेति विहितस्य ज्योतिष्टोमादेः स्वर्गार्थमनुष्ठातॄणां सद्भावेऽपि तत्तत्कर्मसमाराधितेन भगवता तत्तत्कर्मणां फलप्रदानस्य क्रियमाणत्वेऽपि यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः, वेद वादरताः पार्थ नान्यदस्तीति वादिनः । कामात्मानः स्वर्गपरा"

इत्यधिक्षेपदर्शनात् तथाऽनभिमतो न भवतीति अत्रशरण्याभिमतिरपेक्षिता खलु । एवमर्थदार्ढ्य हेतु प्रामाण्यमेतत् त्रयाणां प्रत्येकमस्तीतित्रितयमपि ज्ञातव्यं भवति। किं च श्रीमन्त्रस्य स्वरूपयाथाम्यप्रतिपादनपरत्वात् द्वयस्योपेययाथात्म्य प्रतिपादनपरत्वात्, चरमश्लोकस्योपाय यथात्म्यप्रतिपादनपरत्याच त्रितयमपि ज्ञातव्यम् । अमुमर्थं शास्त्रसिद्धं करोति श्रीमन्त्रः । उप बृंहणसिद्धं करोति चरमश्लोकः । स्वानुष्ठानविषयं करोति द्वयम् । मन्त्रशेषस्य प्रणवविवरणत्ववत् मंत्रशेषविवरणत्वात् द्वयस्य, द्वयविवरणत्वाच्च, चरमश्लोकस्य, त्रितयमपि ज्ञातव्यम् । एतेषां मध्ये प्रथमानुसन्धेयमंत्ररहस्यस्य सर्वमष्टाक्षरान्तस्थमिति सकलार्थप्रतिपादकानां शास्त्राणां, तच्छास्त्रप्रतिपाद्यानामर्थानाञ्च, स्वस्मिन्नंतर्गतत्वात् सकलफलप्रदोहि-विष्णुरित्युक्तप्रमेयवस्तुवत्—

ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम् ।
कैवल्यं भगवन्तं च मन्त्रोऽयं साधयिष्यति ॥

इत्युक्त प्रकारेण सकलपुरुषार्थानां एक साधनत्वात् नारायणाय विद्महे, वासुदेवायधीमहि तन्नोविष्णुः-प्रचोदयादिति मुमुक्षूणामुपादेयतमत्वेनोक्तायां विष्णुगायत्र्यां पठितेषु व्यापकमन्त्रेषु प्रथमोपात्तत्वात्, ईश्वरगुणेष्वेकैकप्रतिपादकेभ्योवंधकफलार्थिभ्योऽसाधारण्येनोपदि-

ष्टेभ्यो" अनन्ता वै भगवन्मन्त्रा इत्युक्तेभ्योमन्त्रान्तरेभ्यो महदाधिक्यमस्ति। तदुपरि व्यापकान्तराभ्यामर्थपौष्कल्येनमहदाधिक्यमस्ति, तदपेक्षयास्यार्थपूर्तिप्रयुक्तमाधिक्यंकिमिति चेत्। षडक्षरीव्याप्यपदार्थान् प्यापनप्रकारं व्याप्तिफलं व्यापकगुणांश्च प्रतिपादयति। व्याप्तिमात्रं प्रतिपादयति इत्यपूर्णा व्यापनप्रकारकथनेऽपि व्याप्यपदार्थवाचकशब्दाभावात् सर्वं वसतीत्यर्थवलेन सर्वशब्दाध्याहारेपि तत्र गुणान्वयाभावात गुणसिद्धयर्थं भगवच्छब्दान्वयस्य आवश्यकत्वाच्च, व्याप्तिफलानुक्तेश्च, श्री द्वादशाक्षर्यप्यपूर्णा। अस्यमन्त्रस्य तद्वैलक्षण्येन व्याप्यपदार्थैर्व्यापनप्रकारेण व्याप्तिफलेन व्यापकगुणानां तौल्येनशब्दशक्त्याप्रतिपादनात्ताभ्यामर्थपोष्कल्यनिवन्धनमाधिक्यमस्ति। एतदाधिक्याभावेऽपिआचार्यवान् पुरुषोवेदाचार्याद्धिविद्याविदिता साधिष्टं प्रापयदित्याचार्योपदेशप्राप्तोऽर्थ एव कस्यचिदुज्जीवनहेतुत्वेन वेदितव्यः। तत्र एतदाचार्यैः एतन्मन्त्रनिष्ठैरस्यैवोपायत्वेनोपदिष्टत्वात्पूर्वोक्ताधिक्याभावेऽप्यवश्यादर्त्तव्यतारूपाधिक्यमस्ति। सर्वज्ञा आचार्या एतन्मन्त्रनिष्ठा अभवन्नित्यत्रको हेतुरिति चेत्। करतलामलकवत् भगवत्प्रसादेन तत्वसाक्षात्कारवद्भिर्दिव्यसूरिभिरैककंठ्येनेतन्मन्त्रस्यैवादृतत्वात्, एतेऽपि तन्निष्ठा अभवन्। दिव्यसूरीणा-

मादरप्रकारः कथमिति चेत् "वरुपुहल नारणन् शेल्व-नारणन् स० १।१०।८ वालपुहल नारणन् स० १०।६।१ तमादिमध्यावसानेष्वयं मन्त्र एव परांकुशेरादतः नाडुमनह-रमुमननकरिय नमो नारायणाय इत्यारभ्य पल्ला० ४ ओधादे नमो नारणाएनपन इति ५।१।६ श्री विष्णुचित्तै-र्नारायणने नमक्वे परैतरुवानित्यारभ्य एन्नैनलंकोंड नारणक्कु ना० ति० ८।६ इति गोदया नान कंडु कोंडेन् नारायणावेन्नुनामम् इत्युपक्रमदशायामेकवारो क्तिवन्नवक्कत्व उक्त्वा नारायणावो मणिवरणा नाहणैयाय् वाराय् । चि० मडल ओपरकालैः, नात्तलुम्पेल नारणेत्यारभ्य नलंतिकड् नारणेति श्रीकुल-शेखरैर्भान्मुखनै नारायणन् पढैत्तान् । ना० ति० १ इत्यारभ्य एड्डे लुत्तुमोदुवार्हल् वल्लर वानमालवे ति० च० ७।७ इतिभक्तिसारैः, ननमालैकोंडुनमोनारण इत्यारभ्य नामंपलशोल्लि नारायणा इति प्रथम-सूरिभि रुपक्रमोपसंहारयोश्चादतत्वात् ।। दिव्यसूरिणामा दरेहेतुस्तत्वप्रतिपादकवेदान्तैरादरकरणम् । तदादरप्रकारः कथमितिचेत् । "विश्वं नारायणमित्यारभ्य नारायणपर-म्ब्रह्म तत्वं नारायणः परः । नारायण परो ज्योतिरात्मा नारायणः परः । यच्च किञ्चिज्जगत्यस्मिन् दृश्यतेश्रूयते-

ऽपिवा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति सकलवेदान्तन्निगमनभूत नारायणानुवाके" एकोहवै नारायणः आसीन्न ब्रह्मा नेशानोनेमे द्यावापृथिवीतिमहोपनिषदि चक्षुश्चद्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यञ्च नारायणइत्यारभ्य दिशश्च प्रतिदिशश्चसर्वं नारायण इत्यन्तंमध्ये सुबालोपनिषदि च "यस्यात्माशरीरंयस्य पृथिवीशरीरमारभ्य यस्यमृत्युः शरीरमित्युक्तमध्यस्थपर्य्यायेष्वेषसर्वभूतान्तरात्मापहतपाप्मादिव्योदेव–एको नारायणइत्यन्तर्यामिब्राह्मणे ऐककण्ठ्येनाद्दतत्वात् । आचार्यवान् पुरुषोवेद, उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिन इति साक्षात्कृततत्वानांसूरीणामादरविषयोऽयं मन्त्र इत्युक्त्वा अनन्तरममीषां संवादकतयावेदान्तवाक्योदाहरणमयुक्तमेवंसति अमीषां संवादार्थंवेदान्तवाक्यानि प्रामाण्येन किमित्युदाहृतानीति चेत् । स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् , इतरेषां चानुपलब्धेरित्यधिकरणे प्रधानकारणत्वादनिराकरणेकृते, ऋषिंप्रसूतं कपिलमित्यादिष्वाप्तया श्रुतिसिद्धस्य स्वयोगबलेन साक्षात्कृततत्वस्य कपिलस्य वेदान्तोपबृंहणार्थंप्रवृत्तायाः स्मृतेरनादरणीयतया स्मृत्यनवकाशदोषः स्यादिति वदतोसांख्यान्प्रति कापिलस्मृत्यादरे" यद्वैकिञ्चनमनुरवदत् तद्भेषज-

मित्याप्तत्वेन श्रुतिसिद्धस्यस्वयोगमहिमसाक्षात्कृततत्वस्य-मन्वादेर्ब्रह्मकारणवादिनीनां स्मृतीनामनादरणायतापत्त्या-वेदार्थानुसारेणप्रवृत्तामन्वादिस्मृतिरुपादेया। श्रुतिविरुद्धा कापिलस्मृतिर्भ्रान्तिमूलत्वात् परित्याज्येति निर्णीतम्। एवं साक्षात्कृततत्वैर्दिव्यसूरिभिरादृतोप्ययं मन्त्रो वेदान्तविरुद्ध-श्चेदनादरणीयः स्यात्। तथाविनावेदान्तैरैककंठ्येनादृ-तत्वादेतैरादृतएवार्थ इत्यस्य संवादित्वेन वेदान्तवाक्यान्या-दर्तव्यानि। वेदान्तेष्वुक्तावपि, 'इतिहासपुराणाभ्यांवेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदोमामयं प्रतरिष्यतीति" इतिहासद्वारावेदोपबृंहणकृद्भिः ऋषिभिः,, किं तत्रबहुभि-र्मंत्रैः किं तत्र बहुभिर्व्रतैः। नमो नारायणायेति मन्त्रः सर्वार्थसाधकः, आसीना वा शयाना वा तिष्ठन्तो यत्र कुत्र वा। नमो नारायणायेति मन्त्रैकशरणा वयम्। नारा यणेति शब्दोऽस्ति वागस्ति वशवर्तिनी। तथापि नरकेघोरे पतन्तीति किमद्भुतम्। आर्ताविषण्णाश्शिथिलाश्चभीताः घोरेषु च व्याधिषु वर्तमानाः। संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनोभवन्ति एवमादिभिरादृतः। एवंसो-पबृंहणैर्वेदांतैरादृतत्वात्, तादृशवेदार्थसाक्षात्कृद्भिः सूरिभिरादृतत्वादाचार्या आदृतवन्तः। तैरादृतत्वादस्माकं अयं मन्त्र एवादरणीयो भवति। किञ्च मन्त्रः सर्वार्थ

साधकः इत्युक्त प्रकारेण क्षुद्रफलं अधिकफलं च स्वयमेव साधयतीत्येतादृशवैभवोपरि तत्तत्फलसाधनकर्मणां जपहोमादिद्वारासहकारी भवतीदमप्येकमाधिक्यमस्ति। तत्र-क्षुद्रफलसाधनज्योतिष्टोमादीनां यदेवविद्ययाकरोति तदेव वीर्यवत्तरं इत्युक्तोद्गीथोपासनन्यायेन तत्साधनसाध्यपुण्यफलोत्पत्तिप्रतिबन्धकप्रबलकर्माणि प्रतिबंधायोग्यानिकृत्वा सहकारी भवति। तथैव विलक्षणपुरुषार्थसाधनीभूत कर्मज्ञानादीनां सहकारी भवति। तत्र कर्मयोगमवलम्बतः कर्मयोगारंभविरोधिपापक्षयहेतुभूत्वा तत्कर्मणो विच्छेदापादकोभूत्वा कर्मसाध्यज्ञानं शीघ्रं फलयति। प्रथमं ज्ञानयोगारंभमिच्छतः कर्मसाध्यज्ञानारम्भविरोधिपापनिवृत्ति कृत्वा तज्ज्ञानस्यानुदिनमतिशयं वर्द्धयित्वा ज्ञानफलं भक्ति शीघ्रं फलयति। भक्तियोगेप्रविशतोभक्तियोगारम्भविरोधिपापक्षयं कृत्वा भक्तिवृद्धिहेतुभूत्वा, भक्तिविपाकपर ज्ञानादिकं कारयति, इति त्रयाणामपि सहकारीत्यस्मिन्नेतेषां वैभवानां हेतुः शब्दवैलक्षण्यमुतार्थवैलक्षण्यमिति चेत। सकलशब्दकारणत्वेनागतशब्दवैलक्षण्यप्रयुक्तो वैभवोप्यस्ति। सकलार्थप्रतिपादकत्वेनागतार्थवैलक्षण्यमप्यस्ति। अन्यच्चपरिमलद्रव्यविशेषस्येवास्य वैभवोऽन्तर्गतवस्तुवैलक्षण्यमिति वा। एवं श्लाघ्यस्यास्यमन्त्रस्यार्थांशे

निष्ठा अस्मदाचार्यास्तत्रक्रोहेतुरिति चेत्तैरिष्टानिष्टप्राप्ति-परिहारयोस्सहकार्यसहत्वेनास्थितस्यकस्यचित् साधनविशेष-स्यपरिगृहीतत्वाद्ज्ञातव्यार्थमात्रज्ञानस्यैवापेक्षितत्वात्। किञ्च श्री परांकुशः स० १-२-१० एणपेरुक्कनलत्तोरपोरु लीरि-ल=वरपु कहलनारणनेन्नुं=नारणन् मुलुवेलुल हुक्कुं नाथन्–एन्नुं । स० २-७-२ 'एनपेरुक्कनलत्तोरलोरुली-रिल वादु पुकदुहल नारणनेन्नुनारणन् मेलुवेलुलहु मुदुनेदुल कुन्नाथननेन्नुमेतन्नारायणशब्दं यदा वदति तदापूर्वोत्तरयोरेतदर्थं च वदतीति काचि-द्वावस्थातस्मादप्येतदर्थांशे निष्ठाभवन्ति। एतदर्थेपृथक्त्वेन स्थितत्वाद्धनसंग्रहवस्त्रवच्छब्दमादत्यवर्तन्ते। एवंसकलशास्त्र-संग्रहः ज्ञातव्ययावदर्थानां पौष्कल्येनबोधकोऽन्यनैरपेक्ष्ये-णसकलार्थसाधकत्वरूपवैभवविशिष्टः साधनांतराणांस्वसम्ब-न्धेनोन्मेषकरः। सकलमन्त्रान्तरेभ्योऽधिक आचार्यैर्दिव्यसू-रिभिर्वेदान्तैः ऋषिभिश्च सर्वैरेकरूकण्ठ्येनाद्रायमाणोयं-मन्त्रः। ॐइत्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति पञ्चाक्षराणि इत्यष्टाक्षरश्छंदसागायत्री चेतीत्यष्टाक्षरस्त्रिपदो गायत्रीछंदो विशिष्टोभवति। ओमित्येकाक्षरमिति प्रणवस्य मन्त्रशरीरावयवत्वोक्त्यैतन्मंत्रशरीरं सकलमन्त्रसाधारण-प्रणवंविनैवाष्टाक्षरात्मकं भवतीति वदतो व्यावर्तयन्ति ।

नारायणायेति पञ्चाक्षराणीति पञ्चाक्षरत्वोक्त्या नारेत्यत्राकारमेकाक्षरं कृत्वेदं षडक्षरमितिवदतो व्यावर्तयन्ति। एवमष्टाक्षरः पदत्रयात्मकोयंमन्त्र आत्मस्वरूपयाथात्म्यंप्रकाशयति। ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा। स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यत इति वेदस्याधः स्रवणाभावार्थमुपरिष्टाद्विशरणाभावार्थमधउपरि च पात्रावत् पिधायवर्तमानः एतन्मन्त्रे प्रथमपदभूतप्रणवो मन्त्रशेषसंग्रह एकाक्षरोऽक्षरत्रयात्मकश्चपदत्रयात्मकश्च वाक्यात्मकश्च तिष्ठति। ओमित्येकाक्षरं ओमित्येकाक्षरं ब्रह्ममूलमायिकवोच्चैयेदुक्तं इत्युक्तत्वादेकाक्षरो भवति अकार उकार मकार इति तानेकधासमभरत् तदेतदोमिति। अकारं चाप्युकारं च मकारं च प्रजापतिः। वेदत्रयान्निरवृहदित्यकारोकारमकाररूपत्वेन स्थितत्वात् त्र्यक्षरोभवति। एकैकाक्षरस्यैकैकार्थवाचित्वात् पदत्रयात्मकंभवति। एतानि त्रीण्यपिपदानि एकस्मिन्नर्थविशेषेपर्यवस्यन्तीति वाक्यात्मकोभवति अस्मिन्प्रणवे प्रथमपदभूतोऽकारः। नामरूपं च भूतानां कृत्यानां च प्रपञ्चनं। वेद शब्देभ्यएवादौदेवादीनां चकार स इति यथा वेदो लौकिकशब्दानांकारणंभवति यथा वा तादृशवेदानां" ऋचो यजूंषिसामानि तथैवाथर्वणानि च। सर्वमष्टाक्षरान्तस्थं यच्चान्यदपि वाङ्मयम इति मन्त्रशेषः कारणं भवति

यथा वा अस्य मन्त्रस्य संग्रहभूतः प्रणवकारणं भवति, तथा तस्य प्रकृतिलीनस्येति प्रकृति शब्देनोक्तत्वेनप्रणवस्यकारणं भवति अकारः । तस्मात् "अकारो वै सर्वावागिति सर्वोऽपि शब्दो अकारान्तर्गतो भवति । अर्थाभिधायिसकलशब्दगर्भितत्वात् तत्तच्छब्दवाच्यार्थानां वाचको भवति । अस्यसर्वार्थवाचित्वं कथमितिचेत् अयमकारोऽवरक्षण इतिधातुनिष्पन्नतयारक्षणवाचित्वात् रक्षणधर्मस्यनिराश्रयत्वनिर्विषयत्वानुपपत्यारक्षणैकनिरूपणीयम् रक्षकवस्तुरक्षणस्य रक्ष्य वस्त्वपेक्षया रक्ष्यवस्तु च प्रतिपादयति । तत्रैकं राज्यंएको लोकएकं त्रैलोक्यमितीव रक्ष्यविशेषवस्तुनो व्यावृत्तत्वेनानुक्ते चिदचिदात्मकं सर्वमपिरक्ष्यंभवति । सर्वस्यरक्ष्यकोटिप्रविष्ठत्वादाश्रयभूतोरक्षकः सर्वरक्षको भवति । रक्षणस्य प्रकारापेक्षा सत्वात सर्वप्रकाररक्षकत्वमुक्तम् । एवं रक्ष्यरक्षकात्मक सकलपदार्थवाचित्वात् तत्तच्छब्द वाच्यार्थानामयमकार एव वाचको भवतीत्ययमर्थः संप्रतिपन्नः । अ इति ब्रह्म अकारो वैविष्णुः अकारोविष्णुवाचकः "अक्षराणामकारोऽस्मि"। यद्वेदादो स्वरः प्रोक्तो, वेदान्ते च प्रतिष्ठितः तस्यप्रकृतिलीनस्य यः परः समहेश्वरः अइति भगवतो नारायणस्य प्रथमाभिभानमभिदधता किं नाम मङ्गलं न कृतमितिप्रमाणैः सर्वरक्षकत्वेनोच्यते सर्वेश्वर इति

संप्रतिपन्नं । किं च नहि पालनसामर्थ्यमृतेसर्वेश्वरं हरि-मितिरक्षणधर्मोभगवद्व्यतिरिक्ताश्रये न तिष्ठतीत्युक्तत्वाद-कारवाच्यस्सर्वेश्वरोरक्षकत्वेनोच्यते। रक्ष्यत्वेन बद्धमुक्तनि-त्यात्मकोभयविभूतिश्चोच्यते । तत्रबद्धवर्गेऽज्ञकोटिं कर्मानु-गुणं रक्षति । मुमुक्षून् स्वरूपानुगुणंरक्षति । मुक्तान्नित्यांश्च भोगानुगुणं रक्षति । अत्रसर्वरक्षकइत्ययमुच्यते । रक्ष्यव-स्तून्येतानि अयंरक्षणप्रकार इत्ययमर्थ उपरिविवरणेविशदो-भवेत् । एवमकारेण स्वेतरसकलपदार्थानांसर्वप्रकाररक्षकः सर्वेश्वरइत्युक्तम् । यतो वाइमानि भूतानि जायन्ते येन जा-तानिजीवन्ति इति यस्मात् सकाशादिदं जगदुत्पद्यते,उत्पन्नं च जगद्येन रक्ष्यते इति सर्वकारणवस्तुन एव सर्वरक्षक त्वोक्तेः । अस्मिन्पदे उक्तं सर्वरक्षकत्वसर्वकारणत्वं च ज्ञापयति । एतद्रक्षणसृष्ट्यादौ ज्ञानशक्त्यादीनामपेक्षित-त्वात् सकल कल्याणगुणात्मकता चोच्यते । अनेन कारण-त्वेनोपास्यत्वं शरणत्वं चोक्तम् । कारणंतुध्येयः यो ब्रह्मा-णंविदधाति पूर्वं योवैवेदांश्च मुमुक्षुर्वै शरणमहं प्रपद्ये इति मुमुक्षूणामुपास्यत्वेनशरण्यत्वेन चोक्तत्वात् । तत् क्रतुन्या-येनोपास्यभूतंशरण्यभूतं वस्त्वेवहि मुमुक्षूणां प्राप्यं भवति । तस्मात् प्राप्यत्वमुक्तम् । प्राप्यत्वप्रयुक्तदिव्यलक्षणविग्रहयो-गादिकं चोक्तम् । अनन्यसाध्यं तत्वस्त्वेव हि आश्रितस्य-

विरोधिनिवृत्तिपूर्वकमभिमतं साधयति तस्मादुपायभावश्चोक्तः। श्रियः पतिरित्युक्तप्रकारेण लक्ष्म्याः भगवत्स्वरूपनिरूपकत्वात् यद्यपि सचितो न निर्भुग्नगुणगणंदैवतं मनसानुधावेत् तथाप्यन्तगुर्णामेवदेवतांभजते। तत्रापि सगुणैवदेवताप्राप्यते इत्युक्तगुणसिद्धिन्यायेनात्रलक्ष्मीसंबंधोप्यर्थादुक्तः। अणुरेष आत्मेति "अस्यामात्मसामान्यप्रयुक्ताणुत्वस्य" यथा सर्वगतोविष्णुस्तथैवेयं द्विजोत्तमेत्याद्युक्तप्रकारेणेश्वरवद् विद्यमानसर्वव्यापकत्वस्य च परस्पर विरुद्धतयासामानाधिकरण्यसंभवादुभयोरपि तत्सिद्ध्यर्थमनुपपद्यमानार्थदर्शनादुपपद्यमानार्थांतरकल्पनरूपार्थापत्याऽपरिच्छिन्नस्वरूपवैभववतईश्वरस्यात्यन्तसूक्ष्मपदार्थेषु क्रियमाण व्याप्त्यर्थं कस्याश्चिच्छक्तेः स्वीकारवत् इयमपि केनचिच्छक्तिविशेषेण व्यक्त्याश्रय जातिवदीश्वर व्याप्तिस्थलेषु व्याप्नोतीत्यस्याः ईश्वरस्वरूपनिरूपकत्वं संप्रतिपन्नम्। व्यक्तिजात्योर्विद्यमानसंबन्धवदीश्वरस्य लक्ष्म्याश्च विद्यमानः सम्बन्धः। तत्र जातिर्व्यक्तिस्वरूपमवलम्ब्यवर्तमानातदभावस्थले स्वयमपि नास्तीति व्यवह्रियमाणा व्यक्तिसद्भावस्थलेषु व्याप्रियमाणस्वाश्रयस्येतर व्यवच्छेदिका शेषभूता च भवति। व्यक्तिर्जातेराश्रयभूता जात्या सहव्याप्ता जातिव्यवच्छेद्या जातेश्शेषिभूता च

भवति । तत्र जातिवत् लक्ष्मीरपि—

अनन्याराघवेणाहं भास्करेण प्रभायथा ।
नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ॥

इतिचोक्त प्रकारेणादित्यप्रभावद् विश्लेपे स्थितिरहिता यथा स्यात् तथेश्वरस्वरूपाश्रयवती ।

यथा सर्वगतोविष्णुस्तथैवेयं द्विजोत्तम ।
त्वया च विष्णुना चांब जगद्व्याप्तं चराचरम् ॥

इतीश्वर व्याप्तिस्थलेषु व्याप्रियमाणाश्रियः पतिर्नित्यश्रीरित्युक्तप्रकारेण भगवत्स्वरूपस्येतरव्यवच्छेदत्व वृद्धिहेतुर्भूत्वा विष्णुपत्नीत्युक्तप्रकारेण भगवच्छेपभूता च भवति । स च यक्तिवत् अस्या आश्रयभूतोऽनया सहव्याप्तः एतत् पुरस्कारेण ज्ञातव्यः अस्याः शेपी च भवति। एवं जातिनिरूप्य घटव्यक्तिकथनेनिरूपकजातेः स्वतोऽन्वयवत् इदमपिपदं निरूप्यमीश्वरं यदा वदति तदा निरूपकभूतां लक्ष्मीं च वदति । एवमस्मिन्पदे सर्वरक्षकत्वं सर्वकारणत्वं सकिल्याणगुणात्मकत्वं उभयविभूतिनाथत्वं सर्वस्मात्परत्वं उपास्यताशरण्यतोपायत्वमुपेयत्वंविलक्षणविग्रहयोगः श्रियः पतित्वं चोक्तम् । अस्मिन्नकारे चतुर्थ्यागतासुपांसुलुगिति लुप्ताभवति । अत्राकारे चतुर्थ्यागतेत्यत्रप्रामाणिकं किमिति चेत् एतद्विवरणनारायणपदस्य

चतुर्थ्यन्तत्वात् संग्रहभूतोऽयमपि चतुर्थ्यन्तोभवेत्। चतुर्थ्यन्तत्वं विना प्रथमांतः सन् तत्वमस्यादिवदात्मपरमात्मनोरैक्यपरो भवतीत्यंगीकारेदिवरणेनविरोधः स्यात्। किंच नारायणपदेनवक्ष्यमाणशरीरात्मभावेन विरोधः स्यात्। अहमपि नमम भगवतएवाहमिति स्वस्वातन्त्र्यनिवृत्तिपूर्वकं भगवदेक पारतन्त्र्यबोधकेन नमः शब्देनविरोधः स्यात्। "पतिं विश्वस्य पतिं पतीनाम् प्रधान क्षेत्रज्ञपतिर्गुणेशः" ज्ञाज्ञौ द्वावजावीशानीशौकरणाधिपाधिपः क्षरात्मानावीशते देवएकः तस्यास्मि परवानस्मि "दासभूताः स्वतः सर्वे ह्यात्मनः परमात्मनः" आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर दासोऽहं वासुदेवस्य" उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति ईश्वरशेषित्वस्य चेतनानां शेषत्वस्य च प्रतिपादक श्रुतिस्मृतिविरोधः स्यात् तस्मादयं चतुर्थ्यन्तोभवेत्। इयं चतुर्थी तादर्थ्येचतुर्थीश्वरस्येष्टविनियोगार्हशेषं भवतीत्युच्यते। अनन्तरमेतच्छेषत्वविरोध्यन्यार्हतांनिवर्तयत्यवधारणार्थ उकारः तथा हि क्षेत्रपुत्रदारदेहगुणादीनांशेषत्वापेक्षया व्यावृत्तत्वेन स्थितः। क्षेत्रादीनां क्रयविक्रयार्हत्वात् अनन्यार्हशेषत्वं नास्ति। पुत्रस्य तद्वत् क्रयविक्रयार्हताभावेऽपि मातापितृप्रभृत्यसंख्यातदेवतानां

सर्वेषामेककाले साधारणशेषत्वेन स्थितत्वात् तस्याप्यनन्यार्हशेषत्वन्नास्ति । अग्निसाक्षिकंपरिगृहीतायाः स्त्रियः कर्मोपाधिकसम्बन्धत्वेन कालान्तरेऽनन्यार्हतायाः योग्यताऽस्ति तस्मात्तस्यापिनिरूपाधिकानन्यार्हंशेषत्वन्नास्ति । तादृशक्षेत्रपुत्रदारादिवत् पृथक् सिद्धिं विना अपृथक्सिद्धत्वेन शेषभूतत्वेऽपि देहस्यानन्यार्हशेषत्वन्नास्ति । भार्याशरीरं भर्तुः शेषं भवति । भर्तुः शरीरं देवादीनां शेषं भवति । अनन्तरमुदरपूरणाय विक्रियलेखनात् देहस्याप्यनन्यार्हशेषत्वं नास्ति । गुणोयस्यैते तस्य तद्धनमितिन्यायेन यत्र गुणी शेषो भवति तत्रस्वस्यशेषत्वात् अनन्यार्ह शेषो न भवति,अपृथक्सिद्धिरस्ति ईश्वरस्येदमात्मवस्तु शेषत्वकालेक्षेत्रादिवत् क्रयविक्रयार्हं न भवति। पुत्रादिवत् सर्वसाधारणविरहेणानन्यसाधारणं भवति । भार्यादावौपाधिकसम्बन्धविरहेण स्वाभाविकसम्बन्धवद्भवति । देहवत् परार्हताविरहात् अपरित्याज्यसम्बन्ध वद्भवति । गुणित्वेन गुणवदनन्यार्हताविरहात् अनन्यार्हशेषोभवति । न तदस्तिविना यत्स्यान्मयाभूतं चराचरम् को ह्येवान्यत् कः प्राण्यात्यदेष आकाश आनन्दो नस्यादितिभगवत्सम्बन्धाभावे आश्रयविधुरगुणवत्सत्ताभावोक्त्या क्रयविक्रयानर्हमित्यर्थः संप्रतिपन्नः । आत्मैवेदं सर्वं ब्रह्मैवेदंसर्वं सर्वंखल्विदं ब्रह्म,

यस्यात्माशरीरं यस्य पृथिवीशरीरं तत्सर्वं वै हरेस्तनुः। तानिसर्वाणि तद्वपुरिति स्वेतरसकलपदार्थानामीश्वरस्य शरीरित्वात् स्वव्यतिरिक्तस्य सर्वस्य तच्छरीरत्वात्। एकात्माधिष्ठितशरीरावयवेष्वन्योऽन्यं शेषशेषिभावराहित्यवदीश्वरशरीरभूतचेतनाचेतनानामन्योन्यशेषत्वस्यायुक्तत्वात्। तस्यशेषत्वस्य सत्वेऽप्यौपाधिकत्वेन "देवर्षिभूतात्मनृणांपितृणां न किंकरो नायमृणी च राजन्" इत्यन्यशेषत्वस्यनिवृत्तत्वादनन्यसाधारणमिदंशेषत्वमितिसंप्रतिपन्नम्। "दासभूताः स्वतः" आत्मदास्यं हरेः स्वाम्यं स्वभावमिति आत्म परमात्मनोः शेषशेषिभावस्वाभाविकत्वोक्त्या शेषशेषिभावहेतुभूत शरीरात्मभावस्य नित्यत्वात् "सोमः प्रथमोविविदे गन्धर्वोविविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुर्यस्ते मनुष्यजाइति पाणिग्रहणानन्तरं सोमादीनां साधारण्येनोक्तायाः पाणिग्रहणपूर्वकाले मात्रापित्रोः शेषभूतायाः शरीरावधिसम्बन्धविशिष्टायाः शरीरेणस्थितिसमये सन्न्यस्तंमयेत्युक्तौ सम्बन्धनाशात् भार्याया अन्यं न व्यावृत्तमिति संप्रतिपन्नम्। यस्य आत्माशरीरं यस्य पृथिवी शरीरमिति शरीरत्वसद्भावेऽपि क्रयविक्रयानर्हत्वेनानन्यसाधारण्येनस्वाभाविकत्वेन च पूर्वमुक्तत्वात् कर्मोपाधिकाद्देहाद् व्यावृत्तमिति संप्रतिपन्नम् तैर्हेतुभिः 'नदृष्टेर्द्रष्टारं पश्येः न मते-

मन्तारं मन्वीथाः' इतिगुणित्वेनश्रुतत्वात् गुणाद्व्यावृत्त-मिति संप्रतिपन्नम्। तस्मात् क्षेत्रादिगतोपाधिविशेषाभावात्। नित्यानपायिनीलक्ष्मीरिवेश्वरस्येदमात्मवस्त्वनन्यार्हशेषमि-त्युक्तम्। उरवेत्न मक्कि गुम्रादु क्क वोदु यादु इति अयं सम्बन्धस्त्वयापि न निवर्तयितुं शक्यः मयापि न निवर्त-यितुं शक्यः उभयोः संकेतेऽपि न निवर्तयितुं शक्य इत्युकारार्थानन्यार्हशेषत्वं गोदाभिरप्युक्तम्। तदेवंभूतं तदु-भव्यमिति एवकारस्थानउकारस्यदृष्टत्वात्। तत्प्रमाणेनाय-मुकारोऽवधारणार्थो भवति। एवमकारेण चतुर्थ्योकारेण-चेश्वररक्षकत्वं चेतन रक्ष्यत्वं चेश्वरशेषित्वं चेतनशेषत्वं च शेषत्वनिष्ठानन्यार्हता चोक्ता। अथ सर्वरक्षक सर्वशेषिस-माधिकदरिद्रसर्वेश्वरं प्रति संबन्धिकानन्यार्हशेषत्वाश्रयं प्रतिपादयतिमकारः। एकस्यसंबन्धस्यसंबन्धिद्वयापेक्षास्ति अत्र सम्बन्धः प्रतिसम्बन्धी च पूर्वमुक्तौ तत्र यथाप्रतिस-म्बन्धिनं विनास्यसम्बन्धस्योदयाभावस्तथाश्रयवैधुर्येऽपि स्थितिर्नास्ति। तस्मादाश्रयविशेषंमकारः प्रतिपादयति। अयं मकारो मन ज्ञान इतिधातुनिष्पन्नत्वेन ज्ञानवाचि-त्वात् विज्ञानंयज्ञं तनुते इत्यत्र विज्ञानशब्दवत्तद्गुणसारत्वा-त्तद् व्यपदेशः प्राज्ञवदिति न्यायेन ज्ञानगुणसारात्मस्वरूप-स्य वाचको भवति। एवं ज्ञानगुणकआत्मोक्तः। ज्ञातृ-

स्वरूपगुणस्यगुणान्तरोपलक्षणत्वात् नित्यत्वैकरूपत्वाणु-त्वज्ञातृत्वकर्तृत्वप्रभृत्यात्मधर्मश्चास्मिन्पदेऽनुसन्धेयाः। अथवा ककारादिमकारान्तानिपञ्चविंशाक्षराणिपञ्चविंशतितत्वानां-वाचकानीति निर्णायकमात्रिकप्रक्रियया पञ्चविंशोऽयंपुरुषः पञ्चविंश आत्माभवतीत्युक्तप्रकारेण पञ्चविंशतितमत्वरूप-स्यात्मनःपञ्चविंशतितमाक्षरभूतोऽयंमकारो वाचको भवति। अस्मिन्पदे एकवचनजात्येकवचनत्वात् बद्धमुक्तनित्यरूप त्रिविधात्मवर्गमपि बोधयति। प्रधानभूतानां चेतनानांमुक्त-त्वेन तेषां भोग्यभोगोपकरणभोगस्थानत्वेनशेषभूतोऽचिद्व-र्गश्चास्मिन् पदे अनुसन्धेयः। चिदचितोरुभयोरपिशेषत्वं तुल्यं चेत् चिदचितावुभावप्यनुपादाय चेतनद्वाराऽचितउ-पलक्षणार्थं चेतनस्याचिदुपादाने हेतुः क इति चेत्। अचिदपेक्षयाचेतनस्य प्राधान्यस्फोरणार्थं चेतनस्यैवशेषत्व ज्ञानोत्पत्तेर्ज्ञानाश्रयवस्तुन एव तादृशशेषत्वज्ञानंनिवर्त्य स्वस्वातन्त्र्यनिवृत्तेः। शेषत्वज्ञानकार्यशेषवृत्तिरुचेश्च तस्यैव वस्तुनो जायमानत्वात् शेषवृत्तिप्रतिबन्धकनिवृत्तिपूर्वकं तादृशवृत्तिसिद्ध्यर्थोपायस्वीकारस्य च चेतनेनैवक्रियमाण-त्वात् निरस्तसमस्तहेयस्य अहमन्नमित्यादिवत् ईश्वरस्य-श्रीकौस्तुभवत् श्रीस्तनवत् स्पृहाविषयत्वात् तस्य कर्मानुभ-वोपकरणत्वेनचस्थिताजडवस्तुनश्चिद्वस्तुनो विलक्षणत्वात्।

तत्प्राधान्यज्ञापनायतद्वाचकपदोपादानम । एवंमकारेण भगवदनन्यार्हशेषत्वस्याश्रयउक्तः । प्रधानभूतमाश्रयं प्रथममुक्त्वाश्रयिभूतस्वभावकथनस्यानंतरमुचितत्वेनआश्रयिभूतशेषत्वं प्रथममुक्त्वाश्रयभूतज्ञानानन्दवस्तुनोऽनन्तरकथनेको हेतुरिति चेत् "अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् । अहं बुद्ध्यापरागर्थात् प्रत्यगर्थो हि भिद्यते" इत्युक्तप्रकारेण परागर्थव्यावृत्ताहमर्थस्य ज्ञानानंदादिभ्यः प्रधाननिरूपकं शेषत्वमिति ज्ञापनार्थं च अग्नौ प्रविश्य केषुचित् दह्यमानेषु तेषां अमुकोऽयमितिनिरूपणं विनैव तत्र ज्वलदग्निशमने यथा यतंते तथा अदाह्यभूतात्मवस्त अनादिकालमारभ्याश्रित्य तद्दाहकस्वस्वातन्त्र्यनिवृत्तिप्रकारे तात्पर्यात् । यथा च पुष्पस्यश्लाघ्यतापरिमलेन तथा स्वरूपस्योपादेयतानेन स्वभावविशेषेण तस्मादेतादृशप्राधान्येन शेषत्वं प्रथममुपात्तम् । अथ तस्य शेषत्वस्य चिदचिदुभयसाधारणत्वादाश्रयविशेषवक्तव्यतया स चाश्रयोचिद्वद्विरूपो न भवति । एकरूपो वर्तत इति धनसंग्रहणवस्त्रं-यथाश्लाघंतेतथा ज्ञानानन्दवस्तु मकारेणोच्यते । उत्कर्षापकर्षहेतुराश्रयाश्रयिभावस्याभावः मोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिस्थलेआश्रयिभूतगुणान् भोग्यतया प्राधान्येनोक्त्वा सह शब्देनाश्रयभूतं स्वरूपमप्राधा-

न्येनाह शेषत्वस्य प्राधान्यादेव श्रीयामुनाचार्याः "वपुरादिषु योपि कोऽपि वा" तत्र शेषत्वविभवात् बहिर्भूतमात्मानमपि न सह इतीदमात्मवस्तुदेहेन्द्रियमनः प्राणादिष्वन्यतममेवस्यात् । ममैतस्यस्वरूपनिर्णयो नापेक्षितः । स्वभावनिर्णयश्च नापेक्षितः किंचिदपिभवतः शेषभूतं स्यादित्येतावदेवापेक्षितंशेषं न भवति चेदेतद्विलक्षणवस्त्वपि नापेक्षितमित्यूचुः श्रुतयश्च "योहमस्मि ससन्पसे यस्यास्मिन् तमन्तरेमी त्यूचुः प्रणवार्थमभिदधन्तः परकालसूरिणश्च कृष्णपुरैकव्रत इतिअकारस्य चतुर्थ्यांश्चार्थमुक्त्वा कस्यापि नोपयुक्त इत्युकारस्यार्थमुक्त्वामकारार्थत्वेन दास इति चोचुः । एवं पदत्रयात्मकेप्रणवेप्रथमचरमपदेसम्बन्धिद्वयमूचतुः । मध्यमपदं तयोः सम्बन्ध विशेषमाह । अयं प्रणवः ओमित्यात्मानंयुञ्जीतेत्युक्तत्वाज्जीववाचकः । ओमिति ब्रह्म "ओमित्येकाक्षरं ब्रह्म व्याहरन् मा मनुस्मरन्" इत्याद्युक्तप्रकारेणेश्वरे वाचकश्च भवति । अस्योभयार्थवाचकत्वं कथमिति चेत् राजपुरुष इति वाक्यस्य शेषशेषिणो राजपुरुषयोर्बोधकत्ववत् उभयवाचको भवति । किंचेश्वरस्वरूपशोधनस्य च कृतत्वादुभयार्थवाचक इत्युच्यते । तथाहि—

मकारेणदेहेन्द्रियमनः प्राणधीभ्योऽन्योनन्यसाधकः ।
नित्यो व्यापीप्रतिक्षेत्रमात्माभिन्नः स्वतः सुखी ॥

इत्युक्त प्रकारेण प्रकृतेः परः स्वयं प्रकाशो नित्यो व्यापकः प्रतिशरीरंभिन्नः स्वाभाविकसुखविशिष्टो भवतीत्युक्त्वा स च परतन्त्रो भवति। तच्चपारतन्त्र्यमनन्यार्हभवतीति चतुर्थ्युकाराभ्यामुक्त्वा तत्पारतन्त्र्यप्रतिसंवन्धी सर्वरक्षकः सर्वेश्वर इत्युक्त्वैवंजीवस्वरूपशोधनकरणाज्जीव वाचक इत्युच्यते। किञ्च सविभक्तिकाकारे ईश्वरस्य सर्वशेपित्वमुक्त्वा तस्यशेपित्वेनस्थितोऽसौ अनन्यार्हशेषो यथा भवति तथा तिष्ठतीत्युकारेणोक्त्वा तादृशशेपित्वस्य प्रतिसम्बन्ध्यपेक्षया चित्प्रकारं चेतनवर्गं मकारेणोक्त्वैवं व्यावर्तक विशेषणस्येश्वरशेपित्वस्य शोधितत्वात् ईश्वरवाचक इत्युच्यते। शेपित्वप्राधान्येऽपि "कृष्णस्य हि कृतेभूतमिदं विश्वं चराचरमितिवच्चतुर्थ्यन्तत्वस्यापि न विरोधः। अस्य प्रणवस्य चेतनशेषत्वशोधन तात्पर्यकत्वे अकारः प्रतिसम्बन्धवाचकः मकारः आश्रयवाचकः उकारः तस्यानन्यार्हतावाचकः। ईश्वरशेपित्वेतात्पर्यञ्चेत् मकारः प्रतिसम्बन्धवाचकः, अकार आश्रयवाचकः उकारस्तादृशशेपित्वनिष्ठासाधारणतावाचकः। अथवा तस्य प्रकृतिलीनस्य यः परः समहेश्वरः इत्युक्तप्रकारेणप्रकृत्यवस्थ प्रणवईश्वरवाचकः। विकृत्यवस्थः प्रणवो जीव वाचीत्युच्यते। एवं प्रणवेन अर्थसामर्थ्येनशब्दसामर्थ्येन च चित् स्वरूपस्याचित्स्वरू-

पस्येश्वरस्वरूपस्य तत्सम्बन्धविशेषस्य प्राप्यस्यप्रापकस्यविरोधिनश्च प्रतिपादनात् सकलशास्त्रसंग्रहमन्त्रविशेषस्यसंग्रहत्वमस्य संप्रतिपन्नम् । प्रणवोक्तानन्यार्हशेषत्ववतोऽस्य चेतनस्यस्वरूपानुरूप उपायविशेष उच्यते उकारविवरणेन नमः शब्देन । पदक्रमेण विवरणमकृत्वैवं विवरणकरणे को हेतुरिति चेत् शब्दक्रमादर्थक्रमोबलीयानिति मीमांसान्यायेनपूर्वं प्रणवोक्तानन्यार्हशेषत्वे व्यावृत्तेष्वन्येष्वन्यतमस्यस्वस्य व्यावर्तनमनन्तरं प्राप्तमतः स्वरूपानुरूपपुरुषार्थज्ञाने जननीयेस्वरूपयाथात्म्यरूपतदीयशेषत्वज्ञानोत्पत्तेरावश्यकत्वात् , कैङ्कर्यप्रतिसम्बन्धिकथनावसरे उभयोरेकोक्त्या प्रथमपदभूताकारविवरणस्यकर्तुमुचितत्वात् । अहमपि न मम भगवत एवाहमस्मीति प्रणवोक्तस्वरूपे विद्यमानममतायाः या काश्चन कृतयो मम भवन्ति, मम ममता नास्ति तासु भगवत एवता इतीति उपरि वक्ष्यमाणपुरुषार्थेविद्यमान ममतायाश्च काकाक्षिन्यायेन निवर्तनेमध्यस्थिते रावश्यकत्वाच्च प्रणवानन्तरमुकारविवरणं नमःशब्दो भवति । अयं नमः शब्दो नेतिमइति पदद्वयात्मकोभवति । अत्र मकारो मन ज्ञानइति धातोर्निष्पन्नः षष्ठ्यन्तो ममोपयुक्त इत्याह नकारस्तन्निषेधकः । अतोऽहं त्वमेवमत्सम्बन्धीपदार्थोपि त्वमेवेत्युक्तप्रकारेण स्वममतानिवृत्तिस्तादृशम-

मतामूलाहंकारनिवृत्तिश्चानुसंधीयते । "द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्मणः पदम् । ममेति द्व्यक्षरोमृत्युर्नममेति च शाश्वतमितिप्रकारेणाहंकारममकारौरवल्वात्मनोऽस्य नाशकौ तन्निवृत्तिः खलूज्जीवनं । एवंतोडानाडिवद् वि॰ मानयोरहङ्कारममकारयोर्निवृत्तिरुक्ता । पूर्वं चतुर्थ्यु॰ पारतन्त्र्येण स्वस्वातन्त्र्येनिवृत्ते अत्रनिवर्तनीयावहङ्कारममकारौ कीदृशाविति चेत् । अत्रभगवत् पारतन्त्र्यविरोधि स॰ स्वतन्त्र्यंनिवर्त्यते । स्वरक्षणे स्वान्वयः खलु तद् विरोध भवति सच भर्तुः स्वरूपहानिः स्वस्य च स्वरूपहानिर्भवति । विशेषणप्रधानोविशिष्टांश एव भर्तुः शेषभूतोभर्वा॰ । अन्यथास्वरूपस्यापिशेषत्वेअत्रोक्तभगवदनन्यार्हशेषत्वस्यानवकाशः स्यात् । तस्मात् आत्मरक्षणार्थंक्रियमाणं पातिव्रत्यधर्मानुष्ठानंभर्तारं प्रत्यनन्यार्हत्वस्थिते वैकल्यं नास्ति । ततो नवद्वारपुररूपे लंकापुरे निरुद्धाया लक्ष्म्या"स्तत्तस्य सदृशं भवेत्" इतिचक्रवर्तिकुमारविषये न्यस्तभरतया स्थितिवत्स्थितिरस्यस्वरूपम् । एवमनेन पदेनास्य स्वरक्षणे स्वान्वयः स्वरूपहानिर्यथा भवतितथेश्वरस्यात्यन्तपरतन्त्रमिदमात्मवस्त्वित्युक्तंभवति । भर्तरि स्वरक्षणक्षमेसति स्वरक्षणात् पतिव्रतायाः निवृत्तौ भर्तैव रक्षको भवति । तथास्मिन्नप्यत्यन्तपारतन्त्र्येण स्थिते ईश्वरो रक्षको भवति । तस्मा-

दीश्वरस्योपायत्वमर्थादुक्तं । ईश्वरस्यैव रक्षकत्वौपयिकतया-स्यात्यन्तपरतन्त्रत्वे सति एतत् पारतन्त्र्यपूर्तिस्तस्येष्टविनि-योगार्हत्वएव भवति तस्येष्टाः "ज्ञानीत्वात्मैवेत्युक्त्वा श्री वैष्णवाः मां दासानां किङ्करंकृतवान् विमल इत्युक्तप्रकारेण स्वस्याभिमतानां श्रीवैष्णवानां शेषकरणे तेषां शेषत्वेन स्थितावस्यंभगवदनन्यार्हशेषत्वपूर्तिर्जायते । तस्मात् त्वच्छ्री मदष्टाक्षरमभ्यस्य त्वद्दासदास्यमहं प्राप्तवानीति श्रीपरकाल सूर्यनुसन्धानवत् अस्मिन्पदे पारतन्त्र्यकाष्टाभूतं तदीयशेष-त्वमुक्तम् । भगवच्छेषत्वपूर्तिस्तदीयशेषत्वे सत्येवेत्युक्तम् । तदीयशेषत्वप्रणवोक्तानन्यार्हशेषत्वविरोधी न भवेत् किमि-ति चेत् श्रीवैष्णवानांजंगमश्रीविमानानीत्युक्तप्रकारेणेश्वरस्य-दिव्यमङ्गलविग्रहवच्छरीरभूता भवन्ति । अतो यथा भर्तृ शरीरे आसक्तायाः स्त्रियः पातिव्रत्यभंगो नास्ति, तथान-न्यार्हशेषत्वस्यभंगो नास्ति । अनन्यार्हशेतत्वाप्रच्युतौ शरी-रत्वं प्रयोजकं चेत् "यस्यात्मा शरीरं यस्यपृथिवीशरीरमि-तिचेतनाचेतन विभागेन सर्वमपिशरीरंभवतिखलु । तस्मात् सर्वान् प्रत्यपिशेषत्वमावश्यकमिति चेत् । सर्वेषामपिशरीर-त्वनिबन्धन सम्बन्ध सद्भावेऽपि वयं शरीरत्वेन शेषभूताः शरीरीश्वरः शेषीतिज्ञानाभावेनाहंकारममकारदूषिततयानिरु-पाधिक बन्धुमीश्वरमपिनासर्पेत्युक्त्वा क्षिपामि न क्षमामि

इति समुद्रश्चोभवत् क्रोधोत्पादकनीचस्वभावत्वात्। एता-दृशदोषस्य कस्याप्यभावेन ज्ञानीत्वात्मैवभक्तप्राण मिति स-र्वाधारभूत ईश्वर एवसर्वेषांधारकभूत इति ज्ञानं यथास्या-त्तथास्य प्रसादयात्रान् श्रीवैष्णवान् शेषत्वेन स्थितिः। शरीरत्व सामान्येन न व्यभिचरति भार्यायाः भर्त्रा सहा-व्यवधानेन सम्बन्धस्य सत्वेऽप्यार्तवादि दोषदूषितत्वेभर्तुः प्रजानां चास्पृश्या भवति स्नानानन्तरंसंश्लेषयोग्या भवति। एवमहङ्कारममकारादिमत्वेत्याज्यास्तन्निवृत्तौ एतएवोपादेया भवन्ति। तस्मादीश्वरप्रसादः प्रयोजको भवति। प्रसादपात्र शरीरमुपादेयं भवति। निग्रहपात्रं त्याज्यंभवति इत्युक्तं भवति। अस्य पदस्यार्थचतुष्टयबोधकत्वे सत्यनन्यशरणत्वे किमिति तात्पर्यं कल्प्यते इति चेत्'' गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभा इति शरण्यं शरणं गच्छतेति उपदेशे कृते "दौपद्यासहिताः सर्वे नमश्चक्रुर्जनार्दन" मित्यनुष्ठान-समये नमस्कारं कृतवन्तः इति स्थानप्रमाणेन नमः शब्दः शक्त्यैवोपायवाचको भवति। एवं पूर्वोक्त क्रमेणार्थसाम-र्थ्येन स्थानप्रमाणेन शब्दशक्त्या चोपाय वाचकत्वादनन्य शरणत्वे तात्पर्यं भवति। एवं प्रणवेन नमः शब्देन च स्वरूपं स्वरूपानुरूपोपायश्चोक्तोभवति। अनन्तरमुपाय फलं कैंकर्यं वक्तुं तत् प्रतिसम्बन्धिनं वक्ति। अकार

विवरणं नारायणपदं रक्ष्यांशोरक्षणप्रकारश्चाकारेविवरणी-
यांशः । तत्र नारशब्देनरक्ष्यांशोविज्ञीयते । नारायणेतिस-
मासद्वयेन रक्षणप्रकारोविज्ञीयते । तत्र रक्ष्य विवरण
कृन्नार शब्दो नर इति नार इति नारा इति च स्वरूपेण-
प्रवाह रूपेण च नित्यान्पदार्थान् वक्ति । स्वरूपेण नित्य-
त्वं नाम सत्तावत्पदार्थस्योत्पत्तिविनाशात्यन्ताभावः । प्रवा
हरूपेण नित्यत्वं नामोत्पत्ति विनाशयोगेसतिपूर्वकाले वि-
द्यमाननामरूपलिङ्गानामनन्यथाभावः, सूर्याचन्द्रमसौधाता
यथा पूर्वमकल्पयत । यथर्तुष्वृतुलिङ्गानि नामरूपाणिपर्य्यये
दृश्यन्ति, तानितान्येवतथाभावायुगादिष्वित्युक्तप्रकारेणत-
त्तद् ऋतुषु व्यतीतर्तषु विद्यमानैः पुष्पफलादिभिर्नामरूपा-
दिभिर्विशिष्टास्तदाकारतया यथा प्रादुर्भवन्ति तथा सृष्टिस-
मये पूर्वसंहृतैः संस्थानैः नामादिभिश्च युक्तान् प्राविर्भवन्ति
तत्र रेफो रीङ्क्षये इति धातोरुत्पन्नः क्षयिष्णुपदार्थवाचको
भवति, नकारेण तन्निषेधपूर्वकं नर नित्यपदार्थं वदति ।
एवं क्षयित्व प्रसञ्जनपूर्वकस्तत्प्रतिषेधः । क्षयिष्णूनां मह-
दादीनां चैकमुखेननित्यपदार्थेषु संग्रहार्थ उच्यते । नार
इति बहुवचनेन तत्समूहबाहुल्यमुच्यते । एवं नारा इत्यनेन
नित्यपदार्थसमूहा उक्ताः । ते च ज्ञानशक्त्यादि दिव्यात्म-
गुणाः गुणप्रकाशका दिव्यमङ्गलविग्रहाः विग्रहगुणाः

सौन्दर्यादयस्तत् सौन्दर्यादिवद् विकसितपुष्पदर्पितकिरीट-मुकुटादि दिव्याभरणानितादृशाभरणैर्विकल्पाहाणिशंखच-क्रादिदिव्यायुधानि एतत् सर्वं कानन चन्द्रिकावद् यथा न भवेत्–तथासमीपे स्थित्वानुभवन्तो लक्ष्म प्रभृतिमहिषी-वर्गाः तत्पंक्तौ कैङ्कर्यंकुर्वन्तोऽनन्तगरुड़विष्वक्सेनप्रभृति-सूरिसंधाः तद्वद्गत्या दास्यंकुर्वन्तोमुक्ताः तेषां कैङ्कर्योप-करणभूताः छत्रचामरादिपरिच्छदाः तादृशकैङ्कर्यवर्धकंप-ञ्चोपनिषण्मयं परमपदं गुणत्रयात्मिकामूलप्रकृतिः पुरुष समष्टिः अहोरात्रादिविभागयुक्तं कालतत्वं, प्रवाहरूपेण-नित्याः महदादयस्तत्कार्याणि अंडानि, अण्डान्तर्वर्त्तीनि चतुर्विधभूतानि च पञ्चोपनिषण्मयत्वात् परमपदमपि समू-हात्मकं भवति। गुणत्रयात्मकत्वान्मूलप्रकृतिश्च समूहा-त्मिका भवति। अहोरात्रादिविभागानामनेकत्वात् काल-श्चसमूहात्मको भवति एवं नारशब्देन व्याप्य पदार्थानु-क्त्वानन्तरं व्याप्तिप्रकारं च वदति। अयनशब्देन आ-वासवाचित्वात् नाराणामयनं यः सः नारायणःनागः अयनं यस्य स नारायण इति तत्पुरुष बहुव्रीहि रूपसमासद्वयेन' अन्तर्बहिश्चतत्सर्वं व्याप्य नारायणः स्थितइत्युक्तप्रकारेणो-क्तनित्यपदार्थानां स्वयमावासभूतस्तान् स्वस्यावासत्वेनस्वी-कृत्य वर्तत इति चोच्यते। स्वस्य तदावासत्वेनस्थितिनीम-

स्वेतर सकलपदार्थानां' मेरोरिवाणुर्यस्यायुतायुतांसशेविश्वशक्तिर्यियंस्थितेतिप्रकारेण स्वस्वरूपैकदेशेधारणम्। तान् स्वस्याधामत्वेनस्वीकृत्य वर्तनंनाम स्वेतर सकलपदार्थानां चिदचिद्विभागेन प्रत्येकमन्तःप्रविश्याकाशादिव्यापनवत् स्वस्वरूपैकदेशेनपनंविनाजातिः प्रतिव्यक्ति यथा व्याप्नोति तथात्मतया परिसमाप्य व्याप्तिं कृत्वा इमामन्तर्व्याप्तिं चस्मृत्वाश्रुतिः "अणोरणीयान् महतोमहीयानितिवदति" स्वव्यतिरिक्तानामावासोभवतीत्यत्र नारशब्देनप्रथमोपात्तगुणानां स्वरूपस्याश्रयत्वात्तदनुसंधानं कार्यं, स्वव्यतिरिक्तानावासत्वेन स्वीकृत्य वर्तत इत्यत्र गुणानां व्याप्यत्वानुपपत्थातद् ब्रह्मव्यतिरिक्तैर्व्याप्तौ कर्मीभवितव्यम्। सगुणेष्वीश्वरस्यव्याप्तिस्वीकारे गुणविशिष्टस्य व्याप्तिः स्वीकार्या। निर्गुणत्वेन वस्तुनः सद्भावाभावात्। तथा च व्याप्यगुणानामेव व्यापकत्वाद् व्यापकगुणानामेव व्याप्यत्वादात्माश्रयः। किञ्च स्वगुणेन गुणिनो व्यापकत्वे तदाश्रय गुणेष्वपि व्याप्तिर्वक्तव्या। तद्व्यापक गुणेष्वपि व्याप्तिर्वक्तव्या। तस्मादनवस्था स्यात्। एवं समस्तकल्याण गुणात्मकत्वमुभयविभूतिनाथत्वं सर्वस्मात् परत्व सर्वशरीरित्व प्रभृत्युक्तमासीत्।

नराज्जातानितत्वानि नाराणीति ततो विदुः।
तान्येव चायनं तस्य तेन नारायणः स्मृतः॥

इति नरोनित्यः सर्वेश्वरः तस्मादुत्पन्नाः पदार्थाः नाराः स्वसकाशादुत्पन्नान् पदार्थान्स्वस्यावासत्वेन स्वीकृत्यवर्तत इत्युक्तत्वात् सर्वकारणत्वमुक्तं । "नारशब्देन जीवानां समूहः प्रोच्यते बुधैः । गतिरालम्बनं तस्य तेननारायणः स्मृत इति प्रकारेण नारशब्दस्य नित्यजीवसमष्टिवाचित्वात्" अयन शब्दस्यइण् गताविति धातुनिष्पन्नत्वेन प्राप्य वाचित्वात् नारायण इति, चेतनवर्गस्य प्राप्यभूत इत्युक्तं भवति बंधु लाभस्य प्राप्यत्वात्, माता पिताभ्राता-निवासः शरणंसुहृत् गतिर्नारायण इतिमदुपकारकः मम वन्धुवर्गः मम स्वामी ममप्राण इत्युक्त प्रकारेण च सर्वविध वन्धुश्च सर्वेश्वरइत्युक्तं विष्णुपोतं विना नान्यत् किंचिदस्ति परायणमित्युक्तप्रकारेणअयनशब्दस्य प्रापकवाचित्वेन चेतनस्यप्रापक इत्युक्तं लक्ष्म्या अपिनारशब्दकोटिघटितत्वादस्मिन्पदे लक्ष्मी सम्बन्धश्चानु सन्धेयः । एवमनेन नारायणपदेन कैंकर्यप्रतिसम्बन्धी उक्तः । मकार विवरणभूतया चतुर्थ्या तच्चरणयोः क्रियमाणं कैङ्कर्यंप्राथ्र्यते । चतुर्थ्यमकारविवरणत्वं कथमिति चेत् शेषत्वस्याश्रयत्वेनैवहिमकारवाच्योऽभिहितः । अकिञ्चित्करस्य शेषत्वानुपपत्तिरित्युक्त प्रकारेण तच्छेषत्वसिद्धेः किञ्चित्कारोपपाद्यत्वात् किञ्चित्कारप्रकाशिकेयं चतुर्थीमकार-

विवरणं भवति । किञ्चित्काराभावे शेषत्वन्नास्ति । शेषत्व रहितंस्वरूपमसन्नेवेतिभवति । एवं त्रिभिः पदैरीश्वरस्यस्वरूपमात्मनः स्वरूपंत्याज्यतयाविरोधिस्वरूपं चोक्तम् । ईश्वरः सर्वशेषी भवति । चेतनवस्तुतस्यानन्यार्हशेषं भवति । स्वस्वातन्त्र्यमन्यशेषत्वञ्च विरोधीत्युक्तम् । प्रणवे नमः शब्दे ईश्वरस्य निरपायोपायत्वंचेतनस्यानन्यशरणत्वं स्वरक्षणप्रवृत्तिः स्वरूपहानिरिति चोक्तम् । ईश्वरकिञ्चित्कारस्यपरमप्राप्यत्वमुक्तं । अस्यानन्यभोगत्वं प्राप्यान्तरसम्बन्धश्चाप्राप्यइत्यर्थश्च चरमपदेनोक्तः । एवमनेन चेतनस्यप्रकृतेः परत्वंप्रकृतेःपरस्तत्शेषत्वमुक्तम्शेषत्वस्यानन्यार्हतामनन्यार्हशेषत्वप्रतिसम्बन्धिनं अनन्यार्हशेषत्वस्याहंकारममकारनिवृत्तिं तन्निवृत्य स्वरूपस्यात्यन्तपारतन्त्र्यं पारतन्त्र्यकाष्ठाभूततदीयशेषत्वंपरतन्त्रस्यानुरूपमुपायमुपायफलं कैङ्कर्यं कैङ्कर्यंप्रति संबन्धिनं च वदति रक्षकांतरप्रतिपत्तिरस्तिचेत् अकारार्थोहृद्गतो न भवति । स्वस्वातन्त्र्यमस्ति चेचतुर्थ्यर्थो हृद्गतो न भवति । शेष्यन्तर प्रतिपत्तिरस्ति चेदुकारार्थो हृद्गतो न भवति । देहात्माभिमानोऽस्ति चेन्मकारार्थो हृद्गतो न भवति । साधनान्तररुचिः श्रीवैष्णवेषु प्रतिपत्तिश्चास्ति चेन्नमः शब्दार्थोहृद्गतो न भवति ईश्वरविभूतिभूतैः सहरागद्वेषैस्तश्चेन्नारशब्दार्थोहृद्गतो

न भवति । अवंधुषु वंधुत्वप्रतिपत्तिरस्ति चेदयनपदार्थो हृद्गतोन भवति । प्रयोजनान्तररुचिरस्ति चेचतुर्थ्यर्थोहृद-गतो न भवति । अथ मूलमन्त्रार्थप्रकरणम् । अस्मदाचा-र्याणांमन्त्रार्थं विशदतमानुसन्धान प्रकारंमन्तारं त्रायते इति प्रकारेण मंतृरत्तकत्वान्मन्त्रशब्दवाच्यं वाक्यद्वयात्मकत्वेन-द्वयनामकं शिष्टाचारद्वारामन्त्रार्थप्रमाणभूतमेतदर्थनिष्ठानाम-नुष्ठान रूपं च भवति । द्वयमूलमन्त्रे नमः शब्देन नारायण शब्देन चोक्तौ सकल शास्त्रतात्पर्यभूमिभूतावुपायोपेयांशौ-विशदयति। एतत्पदोक्तोपायोपेयावेवसकलशास्त्रतात्पर्यविष-याविति कथं निर्णीयते इति चेदुच्यते। तत्तदधिकारानुगु-णेनतत्तदधिकारिणांरुचिविषयीभूतपुत्रपश्वादिपुरुषार्थसिद्धेः साधनविशेषान विदधच्छास्त्रमेव "परीक्ष्य लोकान् कर्मचि-तान् ब्राह्मणोनिर्वेदमायात् । "क्षरन्तिसर्वावैदिक्योजुहोति यजतिक्रिया । अक्षरं नक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः" इत्य-ल्पास्थिरत्वादिदोषबहुलतयानिर्वेदगोचरमुक्त्वा "निरंजनः परमंसाम्यमुपैति ब्रह्मणोमहिमानमाप्नोति" ममसाधर्म्यमा-गताः "सर्गेऽपि नोपजायन्तेप्रलये न व्यथन्ति च । रसं ह्येवायं लब्ध्वानंदी भवति" यत्र नान्यत्पश्यतिनान्यच्छृ-णोति नान्यद्विजानाति सभूमा निरस्तातिशयाह्लादसुखभावै-कलक्षणाभेषजं भगवत्प्राप्तिरेकांतात्यन्तिकीमता एतत्साम-

गायन्नास्ते हावु हावु हावु येनयेनधातागच्छति तेन तेन सहगच्छति । इमं मानव मावर्तं ना वर्तन्ते नावर्तते न च पुनरावर्तते नच पुनरावर्तते"अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्"

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

इत्युक्त प्रकारेण यावदात्मभावितया अनुभवेक्रियमाणेऽपि अनुभूतांशस्याल्पतया अनुभाव्यांशस्य" यतो वाचोनिवर्तते अप्राप्य मनसा सहेत्युक्तप्रकारेणावाङ्मनसगोचरत्वेन निरवधिकवैभवतया संसारस्य बहुधा संतत दुःख वर्षिणीति सुखगन्धाभावेननिष्कृष्टदुःखैक रूपत्ववन्नोपजनं स्मरन्निदंशरीरमितिपूर्वानुभवस्मृते रप्यवकाशोयथा नस्यात्तथानिरवधिकसुखमहाप्रवाहे निमग्नोहमितिनिष्कृष्ट सुखावगाहनरूपत्वेन कालविशेषे आविर्भवति कालविशेषेनिवर्तत इतियत्तद् वैलक्षण्येनभोग्यभूततादृश पर वस्तुनोभोक्तृभूतस्य च भोगवर्धकस्यतस्यदेशस्य चाकालकाल्यत्वात् तत्स्थितिपर्यन्त मनुवर्तमानं साक्षात्निष्कृष्टचेतनस्यस्वरूपानुरूपंभगवद्गुणानुभवजनितप्रीतिप्रेरितंभगवत् कैंकर्यमेव परमप्राप्यं इत्युक्तत्वात्तदुपरि निरतिशयपुरुषार्थत्वेन कस्यचिच्छ्रवणाभावात् । भगवत् कैंकर्यमेवोपेयमिति सिद्धम् ।

एवं परमप्राप्यभूतं कैङ्कर्यप्राप्तुं साधनत्वेन शास्त्रेषु प्रतिपदितान् सत्यंतपो दमः शमो दानं धर्मः प्रजननमग्नयोऽग्निहोत्रं यज्ञोमानसमित्युक्तसाधनसमूहात् तस्मात् सत्यं परमं वदन्ति, तस्मात्तपः परमं वदन्ति इति उत्तरोत्तर मुत्कृष्टत्वेनोक्तासर्वेषामुपरि तस्मान्न्यासमेषां तपसामतिरिक्त माहुः। न्यास इति ब्रह्मा ब्रह्माहि परः परोहि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्परे च यत् इति सर्वोत्कृत्वेन न्यासशब्दवाच्यमुपायविशेषमुक्त्वा तद्व्यतिरिक्तानां सर्वेषा मपकृष्टत्वेनोक्तत्वात्। एतदुपरिविलक्षणोपायविशेषानुक्तेः। तादृश कैङ्कर्यप्राप्तेरुचितोपायो नमः शब्दोक्त एवतस्मादेतावेव सकलशास्त्रतात्पर्यविषयीभूतावुपायोपेयौ। नन्वेवमेतच्छास्त्रतात्पर्यविषयीभूतावत्रोक्तोपायोपेयावेवेति चेत् उपायान्तराणामुपेयान्तराणाञ्चप्रतिपादनेनिदानं किमिति चेद् उच्यते शास्त्रं त्रैगुण्यविषयावेदाइत्युक्तप्रकारेण जननी अन्धवधिरादिविकलकरणानां पटुकरणानां च यथा समानाभवति एवं मातापितृसहस्त्रेभ्यो वत्सलतरत्वात् तमः प्रचुरान् रजः प्रचुरान् सत्वप्रचुरांश्चापथेवर्तमानानतएवनश्यतः त्युक्तुमसमर्थं तत्तद् गुणानुगुणपुरुषार्थानुपदिश्य लतायामहाशाखायामारोहणार्थेयथाक्षुद्रकण्टकानर्पयन्त्येवमेतन्मुखेनस्वतात्पर्यांशे आरोपयितुं प्रवर्तते

इति न विरोधः । तथाहि कस्यचित् स्वकर्मविशेषेण पर-
हिंसासाधनद्रव्यार्जनं कर्तुं रुचिमतः परमपुरुषार्थ लक्षण-
मोक्षतत्साधनयोरुपदेशो न जीवति । तस्यानादरेऽपथप्रवृ-
त्यानाशएवस्यात् । अतस्तस्य रुच्यनुगुणं द्रव्यार्जनं कर्तुं
चौर्यादावन्वयेतदायासमाध्यं अभिमतफलं पाक्षिकं नरको-
दर्कं च भवति । मदुक्त प्रकारेणान्वये तादृशायाससाध्यता
नास्ति अभिमत फलं च सिद्ध्यति । त्वदभिमतपरहिंसापि
न त्याज्याभवतीति विधिमुपदिशति तर्हिंछेदो नास्तीति
तत्रावगाह्यतदनुतिष्ठति तस्मिन्ननायासेनफलपर्य्यन्ते सति-
शास्त्रेऽस्यविश्वासविशेषउत्पद्यते । तेनक्षीणपापी भवति।
पापक्षये परहिंसयोदरपोषणेरुचिनश्यति । ततोऽहिंसात्मके-
नमार्गेण द्रव्यार्जनेरुचिर्ज्जायते । तदानीं वायव्यंश्वेतमालभे-
तभूतिकामः चित्रया यजेत् पशुकामः कारीर्या वृष्टिकामो
यजेतेत्याद्यैहिक फलसाधनानि विदधाति । तादृशैहिकफले-
पुत्रेत्रादिष्वल्पत्वपरिमितकालवृत्तित्वादि दृष्ट्वावहुलेषु
चिरकालवृत्तिषु पदार्थेषु रुचिर्जायते । तदा ज्योतिष्टोमेन-
स्वर्गकामो यजेतेत्युक्तप्रकारेणस्वर्गादिसाधन फल विशेषा-
नुपदिशति । तत्रापि स्वर्गेऽपियातभीतस्यक्षयिष्णोर्नास्ति-
निवृत्तिः । असंतोषश्च भवति दृष्ट्वादीप्तां परश्रियं इत्या-
दिपूक्तप्रकारेण कर्मसाध्यत्वात् कर्मक्षयेक्षीणं भवति ।

निरन्तरं पतनभयमनुवर्तते । परसमृद्धेरसह्यत्वेनानुभवस्याकिञ्चित् करत्वात् । स्वस्य जायमानंसुखमधः प्रवाहेण गच्छति । अतोदेशस्यसृष्टिसंहारादौ कर्मभूर्य वर्तमानत्वात् निर्विपण्णोभवति । तदादुःखाना साक्षान्निवृत्तौरुचिरुत्पद्यते चेत् "योगिनाममृतंस्थानं स्वात्मसंतोपकारिणामित्यात्मप्राप्तिहेतुभूतंयोगविशेषं विदधाति । तदपिज्ञातुमशक्यमपरिमित मल्पंसुखमिति प्राकृतविपयभोगादाधिक्येऽपि स्वात्मानुभव मात्रत्वात् विधवाभोगवत् संकुचितमिति तत् सङ्कोचनिबन्धनोपेक्षा जायते चेत्आनन्दो ब्रह्म आनन्दमयः आनन्दयाति आनन्दी भवति । स्वप्राप्तिमतः सर्वान्परमानन्दिनः कर्तुमानन्दमयंसर्वेश्वरं प्राप्तुमुपायभूता कर्मज्ञानसाधनपरंपरा विधीयते । तेषां साधनानां दुष्करत्वसोपायत्वचिरकालसाध्यत्वविलम्ब्यफलप्रदत्वाद्यनुसंधानेनभीतस्यतादृशसाधनप्रतिकोटिसाधनविशेषंविदधाति । परमपुरुषार्थलक्षणमोक्षस्यविधानं तद्व्यतिरिक्तेपुसर्वेपुपुरुषार्थेपुजुगुप्सावतः तस्यपुरुषार्थस्यसाधनस्य चरमोपायस्यविधानं मुमुक्षोः संसारेविद्यमानं सर्वमपिभयंतत् तत् स्थानेयस्यभवतितस्यैवमेतयोरनधिकारिपूपदेशानर्हत्वात् । अधिकारार्थंतत्तद्गुणानुगुणं पुरुषार्थं तत्साधनानि विदधाति । एवं मूलमन्त्रविवरणभूतेद्वयेपूर्वार्द्धं पदत्रयात्मकं तस्मान्न्यासमेषांतपसा-

मतिरिक्तमाहुः । मुमुक्षुर्वैशरणमहं प्रपद्ये" त्वामेवशरणं-प्राप्य निस्तरन्तिमनीषिणः । सोहं त्वां शरणमपारमप्रमेयं संप्राप्तः "शरणं ते व्रजं विभो" शरण्यंशरणं यातो गोविन्दं नाव सीदति" शरणं व्रज, मामेकं शरणं व्रजेत्यादिपूक्तप्रकारेणमुमुक्षोः कर्तव्यतयोक्तां प्रपत्तिं प्रपत्तव्यविषयविशेषंतस्य निर्भयमाश्रयणे अपेक्षितं पुरुषकारविशेषं च प्रतिपादयति । तत्रपदत्रयात्मके प्रथमपदे श्री शब्दः पुरुषकारं वदति ; उपायस्योपेयार्थत्वेऽपि व्युत्पत्ति समयातिरेकेणानुष्ठानसमयत्वात् उपायानुष्ठानानन्तरमुपेयसिद्धेः । प्रथमोपादानवत् तादृशोपायस्वीकारस्यप्रथममपेक्षितत्वात् घटयतः पुरुषकारस्यप्रथमपदे पुरुषकारतैकांतैःस्वभावविशेषैर्विशिष्टं वस्तु विशेषं निर्दिशति श्रीशब्दः । तौ च स्वभावौपुरुषकारत्वेनप्रतिपन्नवस्त्वाश्रयणसमयेपुरुषकारान्तरापेक्षायथा न स्यात्तथानेनवर्तमानः साक्षात् सम्बन्धः । अस्य चेतनस्य स्वाभिमतविषयेण घटनसमये अस्येवस्वस्यापिपुरुषकारान्तरापेक्षांविनाघटयितुं तद्विषयेण विद्यमानः साक्षात् सम्बन्धश्च एवमेतदुभयमपिपुरुषकारवस्तुनोऽवश्यापेक्षितं तत्स्वभावद्वयमपि श्रिञ् सेवायामितिधातोः श्रीयते श्रयते इतिव्युत्पत्तिद्वयेनप्रकाशयति । व्युत्पत्ति द्वयेन स्वयं सेव्यतेसेवते इति सेवाविषयत्वेनतदाश्रयत्वेन च तिष्ठतीत्यु-

च्यते । ईश्वरीं सर्वभूतानामस्येशाना जगत् इति भगवद्व्य-तिरिक्तानां सर्वेषांपदार्थानामीश्वरीत्युक्ततया त्रिविधात्म-वर्गैः सेव्यते इति सेवा विषयभूता तिष्ठति विष्णुपत्नी विष्णोः श्रीः ह्रीश्चते लक्ष्मीश्चपत्न्यावित्यादिभिः पत्नीत्वेनेश्व-रस्यशेषभूतेत्युक्ततया तं सेवेत इति सेवाश्रय वर्तते इत्युक्तं । अतः कर्मकर्तृ भावविरोधोनास्ति । माता चेत् प्रजानांस्वा-मिनो भर्तुश्च शेषभूता च स्यात् । "त्वं माता सर्वलोकानां देवदेवोहरिः पितेत्युक्तम् । एवं मातृत्वेन चेतनैर्नित्य सम्ब-न्धवत्वात् पत्नीत्वेनेश्वरेण नित्यसम्बन्धवत्वाच्च पुरुषकारा-भूतालक्ष्मीरिति व्युत्पत्तिद्वयेनोक्तम् । पुरुषकारभावैकान्त-तयास्यामुक्तस्यसम्बन्धद्वयस्यप्रयोजनविशेष उच्यते । शृ-णोतीति श्री श्रावयतीतिश्रीरितिनिरुक्तं शृणोतीति चेतन सम्बन्धकार्यमुक्तम् । श्रावयतीतिईश्वरसम्बन्धकार्यमुक्तं । तथा हि ईश्वरतत्त्वं नास्तीति लेखनसमयेऽपिस्वरूपनाशो-यथा नस्यात्तथागत्रोमठभोजयितारइव नेत्राविषयोरक्षति । करणकलेवरवैधुर्येणाचित्कल्पत्वेन स्थितावपेक्षानिरपेक्षं दयमानमनाः सन् करणकलेवराणि ददाति । ततोऽस्य प्रवृत्तिनिवृत्तिशक्त्यर्थमनुप्रविशति । ततोऽसुरराक्षसादि-भिः पीडनसमये लोकेऽवतरति अतिक्लेशान्प्राप्नोति । रामकृष्णादिरूपेण वक्षसि शरः पीडितः शत्रून् संहरति ।

अस्मान्प्राप्तुमनुरूपः कश्चिदुपायः स्यादिति मनोरथेन वेदान् वैदिकांश्चप्रवर्तयति । एतैरनुभूयमानं दुःखं दृष्ट्वाभृशंभवतिदुःखित इत्येतेभ्योऽप्यधिकं व्याकुलितमनाभवति । साधनत्वेन दत्तानि करणकलेवराणि एव बाधकानि भवन्ति चेत्तान्युपसंहरति । ततः स एकाकी नरमेत इति नित्यविभूतियुक्तः स्वयमेतद्विश्लेषासहिष्णुत्वात्शरीरं यथा श्वेतं स्यात्तथा निरुपाधिकसम्बन्धयुक्तत्वात् रक्षयापेक्षांप्रतीक्षत इतिएतद्दुःखासहिष्णुतयाप्रविश्यरक्षितुमवकाशोदेय इति अवसरंप्रतीक्षते ।

"बद्धाञ्जलिपुटंदीनं याचतं शरणागतं ।
अरिः प्राणान् परित्यज्य रक्षितव्या कृतात्मभिः ।।"

इति स्वनाशेऽपि आश्रितो रक्षणीयः इति वर्तते दोषो यद्यपि तस्यस्यात् "न त्यजेयं कथंचन" समोऽहंसर्वभूतेष्विति स्वभावविशेषा एवमादयः सर्वेआश्रयणीये सर्वेश्वरे समवेताः सन्ति । एतादृशस्य तस्य वात्सल्यशीतलं हृदयं क्रोधमाहारयत् तीव्रमित्युक्त प्रकारेणक्षुभित समुद्रवत् यथा क्रोधयुक्तंस्यात् । प्रियंवदइत्युक्तप्रकारेणामृतसंजीवनी अमृत वाक् क्षिपामि नक्षमामीति विषधाएगच्छन्नण कटुका च सर्वोज्जीवनहेतुभूतास्तस्यदिव्यव्यापारानरकादौपातयित्वाराशितः पृथक् पृथग्विभज्यानुभवं कारयितुम् यथोप-

युक्ताःस्युः । तथानादिकालं क्रियमाणानां भगवदपचारभागवतापचारासह्यापचाररूपनानाविधानन्तापचाराणामनुस - न्धानेन जायमानेनांतः कालुष्येणानादिकालंकर्माणि विभज्य तत्तदनुरूपफलानुभवं कारयति । तथा कुर्वतं तं तस्यासृग्युक्तहस्तप्रक्षालनं यथा न स्यात्तथा पापानि कुर्वाणोऽहमाश्रयामि तस्यकर्माणिप्रतिबंधकानिसंतीतिभयातिशयेन-स्तब्धं संसारे दुःखस्य तद्विषय वैलक्षण्यस्य च बलात्कारेण पूर्ववदाश्रयवैमुख्यासमर्थंदुष्करत्वादिना साधनान्तरे प्रवेष्टुमशक्तं गत्यन्तराभावेनव्याकुलं चेतनमीश्वरहृदये वर्तमानं कालुष्यंशमयित्वा तेन सह टितुमस्माभिस्तेन च विघशनेन निरुपाधिकसम्बन्धेन युक्तां "न कश्चिन्नापराध्यतीति असू विनागतिर्नास्तीति काक वृत्तान्तादिमुखेननिर्णयित्वा" प्राणपात प्रसन्ना हि मैथिली जनकात्मजेतिपुरुषकारनिरपेक्षामंजलिमात्रसुलभामिमामाश्रित्य "मातर्मैथिलि राक्षसीस्त्वयितथैवाद्रापराधास्त्वया। रक्षन्त्या पवनात्मजाल्लघुतरा रामस्यगोष्ठीकृतेतिवाक्याद्यभिनिवेशरहितस्य-पूर्वापराधेनेश्वराश्रयणेविभ्यतोमम निरुपाधिकजनन्या भवत्याश्चरणातिरिक्त गतिर्नास्ति । अथाहमीश्वरस्यविषयोरक्षितः श्यामथवा स्वातन्त्र्यविषयौ नाशितः स्याम् । विभ्रमनिवृत्त्यवकाशो नास्ति । तस्मादनन्य गतिकस्य दासस्य

मम हित मेतदिति ज्ञात्वा रक्षणं भवत्या भरइत्येतदुक्तं वा-
चंभृणोति । एवमुष्णजलस्य शीतल जलमिवनिरंकुश स्वा-
तन्त्र्येणाभिमतः पावकोपममितिप्रकारेणाऽभिभवनीयमी-
श्वरं स्वभाग्यतातिशयेन परिपक्वंकृत्वा स्वामिन् चेतनम-
ङ्गीकुरुष्वेति वदति लक्ष्मीः ।" श्रुतिस्मृती ममैवाज्ञेतिम-
माज्ञारूपशास्त्रमर्यादामतिलंघ्यमनसि व्रणं यथा स्यात्तथा-
त्यन्तापराधान् कृत्वा तिष्ठति खलु । तत्कथमङ्गीकुर्यामिती-
श्वरे वदति । तस्य पूर्वापराधान् भवत् क्षमाविषयान् कृत्वा
रक्षत्विति लक्ष्मीः क्षमारक्षणायशास्त्रमर्यादा रक्षणार्थं
भवतः स्वाभाविकंक्षमातत्व कथं विनाशयत इति लक्ष्मीः
क्षमारक्षणे शास्त्रमर्यादा नश्यति शास्त्रमर्यादा रक्षणे-
क्षमा तत्वं नश्यति । उभयो रविरोधेन किं कर्तव्यम् इती-
श्वरे किं कर्तव्यमूढेऽपति तर्हि उभयो रपि विरोधो न स्या-
त्तथा उपाय उच्यते । तच्छ्रुत्वा तथा कुरुष्वेति लक्ष्मीः
उभयोर्विरोधं विना चेतनरक्षणेउपायोऽस्ति चेत् किमस्मा
कमनभिमतः वक्तव्य इतीश्वरः तर्हि शास्त्रमर्यादांविमुख
विषये कृत्वा भवतः क्षमामभिमतविषयां कुरुष्व तदाभय-
मपि जीवतीति विषयविभागं करोति लक्ष्मीः । तं श्रुत्वा
समीचीनोऽयं विषय इतिचेतनमङ्गीकरोतिईश्वरः । एवमी-
श्वरं सापराधजं त्वंगीकारोपयुक्त वचनजातं श्रावयतीति

एवं पुरुषकार समर्पकस्वभावविशेषास्तत्कार्याणि च धर्मि-ग्राहकप्रमाणेन श्रीशब्देनोक्तानि । एवं पुरुषकारत्वेऽपि अस्यामसन्निहितायां चञ्चलं हि मनः चलचित्तमित्याद्युक्त प्रकारेण वात्यावत् परिभ्रमति संसारिचेतनचित्ते परिपक्वे रुचेरंकुरितत्वात्क्षणभंगुरत्वात् पदङ्कुरशोषणात् पूर्वमी-श्वराश्रयण उपायाभावात् पूर्ववदेवांधो भवतीति शंकया रुच्युत्पत्तिकाल एवाश्रयितुमुपयुक्ततया आश्रयणीयवस्तु-नानित्यं संयुक्ता तिष्ठतीतिमतुपा प्रतिपाद्यते । नित्ययोग-मतुप्त्वादियं नित्यानपायिनीत्युच्यते । तत्रहेतुः क इति चेत् ज्ञानानन्दलक्षणभगवत्स्वरूपस्य ज्ञानानन्द स्वरूपादा-त्मस्वरूपाद् व्यावर्तकानिहेयप्रत्यनीकत्वविभुत्वशेषित्वादी-नीव श्रियःपतित्वम् । मृदुपादानघटकरकादिषु पृथुबुध्नोद-राकाररूपाघटत्वजातिर्यथाघटं करकादिभ्यो व्यावर्तयति । तथा व्यावर्तकमिति स्वरूपनिरूपकत्वात् स्वाभाविकत्वेनौ-पाधिकत्वेन च भगवत्सारूप्यं प्राप्तानां नित्यानां मुक्तानां च विग्रहेभ्यो व्यावर्तकतया श्रो वत्सवक्षा इत्युक्तप्रकारेणा-साधारणदिव्यमङ्गलविग्रहस्य निरूपकां । मिथुनविषये किञ्चित्कारविच्छेदेक्षणकालमपि धारणासमर्थैर्नित्यैः मुक्तैः क्रियमाणं नित्य कैङ्कर्यं स्वीकर्तुं श्रियासार्धमास्ते इत्युक्त प्रमाणेन निरन्तरं संश्लिष्य वर्तमानत्वात् । विभ-

त्वाद्रिषु च" देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी। विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम्। इति प्रकारेण तत्तदवतारजातीय विग्रहं परिगृहीत्वाऽवतरणात् तदुपरिक्षणमपि न विश्लिष्यामीति वक्षसि स्थित्वा मडलग्रहणं यथा स्यात्तथाभगवद्भोगमग्नतया जलान्मत्स्याविवोद्धृताचितिक्षणकालविश्लेषासहत्वात्" स्वयं श्वरूपेणसदानुभूतमप्यपूर्ववद्विस्मयमादधानयेतिप्रकारेण भगवदनुभवावगाहनं कृत्वा मुक्तनित्यसङ्घैः स एकधाभवति द्विधा भवतीति त्रिधाभवति शतधा भवति सहस्त्रधा भवतीति स्वीकृतानेक शरीरैर्निरन्तरमनुभूयमानोऽपि निरवद्यः परः प्राप्तेरित्युक्त प्रकारेणानुभूतांशस्याल्पत्वेनानल्पानुभाव्यांशविशिष्टेनईश्वरेण स्वयमपि स्वस्य ज्ञानशक्त्यादिभिः वैश्वरूपेण चावगाह्यकालकाल्यैकदेशविरोधं विनापि निरन्तरानुभवे क्रियमाणेऽपिहस्तिनोऽश्वस्थापनवत्तद्वै श्वरूप्यानुभवं सर्व भोगोपोद्घातकेली चुलकितं कर्तुं शक्तेन तस्या निरतिशय भोग्यतातिशयेनवक्षसि स्थितायां तस्यां मडलग्रहणं यथास्यात्तथा तस्यक्षणकालमप्येतद् विश्लेषासहत्वादियं नित्यसंयुक्ता तिष्ठति। श्रियत इति व्युत्पत्या त्रिविधात्म वर्गाद् व्यावृत्तिरुच्यते तासां नित्यसंयोगहेतुभूतानि स्वरूप निरूपकत्वादीनि न सन्ति। एवमनयोक्तां वाचमादरेण

श्रोतुं हेतुभूतेनानेन विद्यमानेन निरूपाधिकसम्बन्धेन च नित्यानपायिनात्वेन स्थिताकमलवासिनीभोगपरवश इत्युक्त स्वभोगतातिशयेन चनिरूढत्वस्वापादकेन स्वोक्तिविशेषेण च तत्स्वातन्त्र्यंशमयित्वा घटयितुं क्षमा भवतीति पुरुषकारभाव उक्तः। ननु श्रीमन्नारायण चरणावित्युपायतया वक्ष्यमाणस्य नारायणस्यविशेषणत्वेन श्रीमत्तायामुक्तायां नारायणशब्दवक्ष्यमाणानां गुणविशेषाणां विशेषणत्वेनोपायशरीरेऽन्वयवत् अस्याश्चोपायावयवत्वात् प्राप्तत्वात् मातापितृभ्यामपिसह स्थित्वाग्रजा संरक्षणस्य कर्तव्यत्वात्। तदुपरि अजहत्पग्मिलेपुष्वेवर्तमाना पापं निवर्तयतीत्युपायकृत्यस्य विरोधिनिवर्तकत्वस्यैतदर्थनिष्ठानां पराांकुशादीनामभिप्रायेणाभिहृत्वात् प्रदेशान्तरेषु पुरुषकारत्वेनैतत्प्रतिपादक वचनानामुपायभावान्वयस्योचितत्वात्। किंचारिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मनेति करिष्यमाणायाः प्रपत्तेरेवपुरुषकारस्थानीयत्वात् अन्यथास्यांस्वातन्त्र्यंशमयित्वा घटयन्त्यामुपायभूत ईश्वर एवरक्षतीत्युपायानन्वितस्या अस्याःप्रपत्तेरनुष्ठानंनिष्फलं स्यात्। अतोऽस्या उपायेऽन्वय एव वाच्यः तत्कथमनुपायत्वमुक्तोपायपरत्ववचनानां पुरुषकारभावसंकोचः क्रियते इति चेन्न। उपायविशेषणत्वेऽपि विशेषणभूतगुणविशेषवदस्या

उपायोपयोगित्वाभावात् । समाश्रयणैकान्तानां, सौशील्या-
दिगुणविशेषवदस्या उपायोपयोगित्वाभावात् । समाश्रय-
णैकांतानां सौशील्यादिगुणानामुदयविरोधिस्वातन्त्र्येऽन-
यापुरुषकारभूतयाप्रशमिते तस्य कार्यकरणसमयेरच्यावेचां
प्रतीक्षत इति प्रकारेणोपाय प्रार्थनारूपायाः प्रपत्तेरपेक्षित-
त्वात् पापं निवर्तयतीति वचनस्य दुःखं निवर्तय मा वा
दुःखनिवर्तकस्त्वन्तरसद्भावेनवान्भवामीति वदत उक्ति
रूपत्वात् । तस्य च वचनस्यैतत् सहस्रशाखाध्ययननिष्ठे-
ष्वस्याविद्यमानादरातिशयप्रकाशकत्वाच्च पुरुषकारभावेता-
त्पर्यात् । नन्वस्या उपायावयवानन्वये सति साधनभूत कर्म
ज्ञानादीनां फलमत उपपत्तेः स प्रीतोऽयं फलायेति चाग-
धन प्रीतेश्वर मुखेनेष्टानिष्टप्राप्तिपरिहार रुपफलसिद्धिरन-
येति वक्तव्यं । अथवा फलप्रतिपादनहेतुभूतानां ज्ञानशक्त्या
दीनामुत्पादकतया वक्तव्यमिति चेन्न । अस्याः फलप्रसाद-
यितृत्वे "यः सर्वज्ञः सर्ववित्परास्य शक्तिर्विविधैवश्रूयते
स्वाभाविकी ज्ञान बलक्रिया च । तेजोबलैश्वर्य महावबोध
सुवीर्यशक्त्यादिगुणैकराशिरिति श्रुति स्मृत्यादिष्वीश्व-
रस्य प्रतिपाद्यमानानां ज्ञानशक्त्यादीनांगुणानां विरोधः
स्यात् । ननु सौशील्यादीनिव तिरोहितान्गुतान् प्रकाशय-
तीति चेन्न । जगत्सृष्टिस्थितिसंहारादिषुसदाविनियुक्तानां

ज्ञानशक्त्यादीनां सौशील्यादीनां तिरोधायकस्वातन्त्र्यव-त्तिरोधायकाभावात् । अन्यथा सृष्टयाद्यनुपपत्तेः सर्वथा तस्या उपायान्वये स्वविरोधिनिवृत्तौ तत्तस्य सदृशंभवेदिति स्थिति र्न संभवति गुणविशेषाणामवस्थितिरेव नभवति" आसंशेयं हरिश्रेष्ठ क्षिप्रं मांप्राप्स्यते पतिः । अन्तरात्मा च मे शुद्धस्तस्मिंश्च वहवोगुणाः । इतिस्वस्मिनन्योपायत्वं तस्मिन् कल्याणगुणविशेषांश्चफलसिद्धयपेक्षिततया निर्णी-तवती । नन्वस्माभिरुपायतया स्वीकृतस्यवस्तुनः स्वरूप-निरूपकत्वात् प्रणवे प्रथमपदवत्यद्यपि सचित् इति गुणसि-द्धिन्यायेनेयमवर्जनीयतयान्वेतीति चेन्न । स्वरूप निरू-पकत्वेना-वर्जनीयसंबन्धवत्वेऽप्युपायदशायांकर्तव्यस्य प्रयो-जनस्याभावात् । ज्ञानानन्दत्वादिस्वरुपनिरूपकगुणवत् स्वारूपाश्रयगुणान्तरवच्च स्वरूपेऽनुपयुक्ततया तिष्ठति । न-न्वेतेषां प्रयोजनं नास्तीतिनिवृत्तौ हेतोर्नैरपेक्ष्यस्य हेतुत्वे केषांचिद्गुणविशेषाणामुपायतयान्वयः कथमिति चेन्न । तेषां कार्योपयोगित्वात् गुणत्वेन पृथक् बुद्धिप्रवृत्तिकत्वा-भावात् । गुणिनो गुणद्वाराकार्यकरत्वे नैरपेक्ष्यभंगाभावाच्च-तेषामन्वयेविरोधो नास्ति अस्याः कार्यानुपयुक्तत्वात् । द्रव्यत्वेनपृथग्बुद्धियोग्यतयोपायनैरपेक्ष्य विरोधाच्चोपाय भा-वेऽन्वयो नास्ति । तस्मात् शेषित्वदशायामेकस्यमिथुनस्यो-

पांयदशायां स्वेतरसकलसहायासहत्वेन स्थितत्वादस्या उपायभावेऽन्वयो नास्ति पुरुषभावएवान्वयः नन्वनेन चेतनेन सम्बन्ध ईश्वरस्य लक्ष्म्याश्च तुल्यः एवञ्च सपुरुषकारद्वारासमाश्रयणीयः इयं च पुरुषकारभूतेत्यत्र कोहेतुरिति चेन्न। तस्य पुरुषोत्तमत्वात् पुंस्त्वप्रयुक्तकाठिन्यमस्ति देवदेवोहरिः पितेतिपितृत्वप्रयुक्तं हितपरत्वमप्यस्ति। किञ्च स्वेतर सकल पदार्थनिरुपाधिकनिर्वाहकतया दहपचेतिक्रौर्यसद्भावात्तदाश्रयणसमयेपुरुषकारद्वाराश्रयणं कार्यं अस्या नारीणामुत्तमत्वात् स्त्रीत्वप्रयुक्तमार्दवयुक्तत्वात् त्वं माता सर्वलोकानामित्याद्युक्तप्रकारेण मातृत्वप्रयुक्तवात्सल्यातिशयात् तत्तत्कर्मानुगुण्याभावप्रयुक्तमाधुर्यात्तदपेक्षया महदाधिक्यमस्ति तस्मादियं पुरुषकार भूताभवति। एवं श्रीमत् पदेनाश्रयणैकान्तोविलक्षणपुरुषकारयोगउक्तः। अनन्तरं नारायणपदं अस्य चेतनस्य पूर्वापराधदर्शनेनसमुद्रक्षोभवत्। स्वाभाविकसौशील्यादितिरोधायकस्वातन्त्र्य शमनपूर्वकं-पुरुषकारबलेनोद्भावितान् सौशील्यादिगुणविशेषान् वदति। स्वातन्त्र्याभिभूतगुणोदयएवपुरुषकारकृत्यम् नन्वस्यगुणोदयस्य पुरुषकारसापेक्षत्वे उपायस्य साध्यत्वसापेक्षत्वेस्याताम्। अनुद्भूत गुणानामुद्भूतत्वादुपायस्यसाध्यता उपायत्वस्वरूपोत्पत्तेः सहकारिसापेक्षत्वात् भक्तिवदङ्गसापे-

च्वता स्यात् । नचस्वरूपगतानांतिरोहितानां प्रकाशनमात्रेण पुरुपकारस्य कथमङ्गसाधनत्वमिति वाच्यम् आत्मधर्मस्य भक्तिविशेषस्य प्रकाशकाः कर्मयोगादयो अङ्गसाधनत्वेनोच्यन्ते । तस्मादुपायान्तरव्यावृत्तिरूपे सिद्धत्वनिरपेक्षत्वे न स्यातामिति चेन्न । उपायत्वन्नामेष्टानिष्टप्राप्तिपरिहारकत्वं, तच्चोपायत्वं ज्ञानशक्त्यादिगुणविशिष्टस्येश्वरस्यैवेति वात्सल्यादिगुणानामुपायत्वन्नास्ति । किन्त्वाश्रयणैकांतत्वमेव । तस्मादुपायभूतानां ज्ञानशक्त्यादीनामुत्पत्त्यादेः पुरुपकारापेक्षाभावात् । उपायान्तरव्यावृत्तिरुपयोः सिद्धत्वनैरपेक्ष्ययोर्नविरोधः । तस्मान् मामितिस्वीकार्यविपयेस्वीकारैकान्तान्सौशील्यादीनुक्त्वा अहमिति पापविमोचके ज्ञानशक्त्यादयोनुसन्धीयन्ते । वात्सल्यन्नाम वत्सं लालयतीति व्युत्पत्त्या तदानीमुत्पन्नवत्सविपये मात्रा क्रियमाणो व्यामोहः, स च पार्श्वस्थतृणस्योपेक्षादशायामपि स्वोदरादुत्पन्नस्यवत्सस्यमलदुर्गन्धं स्वस्य भोग्यत्वेनस्वीकृत्य स्वकीयक्षीरेण तद्रक्षणवत्, "दोपो यद्यपि तस्यस्यादिति आश्रितगतदोपान् स्वलाभत्वेनादृत्य दूरीकृत्य स्वगुणेनतेपां धारयितृत्वं, आत्मगुणानुसन्धानरूपतयाश्रयगुणानन्तर भाविपापविमोचनेन न विरोधः । स्वामित्वन्नाम—वात्सल्यस्यनिदानमीश्वरप्राप्तिरात्मनो न भवति, आत्मप्राप्तिरीश्व-

रस्येतिवक्तुं योग्यमेतच्चेतनवस्तुवैशिष्ट्यं स्वाम्येवस्वप्राप्तौ यतते। वत्मलोऽपि प्राप्तोऽपि" तमसः परस्ताद्रजसः पराके इत्युक्तदेशविशेषेऽवाक्यनादर इत्युक्त प्रकारेणस्वस्य विशृङ्खलितैश्वर्यस्यसर्वस्य प्रकाशो यथास्यास्तथा स्थितश्चेत् अस्मिन्देशेऽतिक्षुद्रेण चेतनेनाश्रयणं कर्तुमशक्यं स्यात्। ततः महतोमंदैः सह नीरन्ध्रेणसंश्लेपस्वभावत्वं शीलमिति महान्तमात्मानं नीचीकृत्य "हे कृष्ण हे यादव हे सखेति इति वक्तुंयोग्यतयाल्पैः सहैकजलवदेकरस्येनस्थित्वाविनियोगकरणम्। विनियोगसमये" चात्मानंमानुषं मन्ये रामं दशरथात्मजमित्युक्तप्रकारेणस्ववैभवः स्वहृदयेऽपि यथा न लग्नः स्यात्तथां विनियोगकरणं। सौशील्यंदेशकालादिविप्रकर्षेण रुचिसमयेऽप्याश्रयणमशक्यं स्यादतः सर्वदा सर्वैराश्रयितुमर्चावतारेण सुलभभवनं। सौलभ्यं परमपदक्षीराब्धिप्रभृति देशविप्रकर्षेणाश्रयितुमशक्यं। विभवादिकालविप्रकर्षेणेदानींतनानामाश्रयितुमशक्यं। अन्तर्यामित्वादिचक्षुविपयत्वाभावादाश्रयितुमशक्यम् कालविप्रकर्षप्रयुक्तन्यूनताभावात्। देशविप्रकर्षप्रयुक्तन्यूनताभावात्। अचक्षुर्विपयताप्रयुक्तन्यूनताभावात्। पश्चात्तनैराश्रयितुं योग्यतिरुमुक्कुलमिति दिव्यदेश इति सर्वसमाश्रयणयोग्योभवत्यभिमतः देशस्ततसर्वं सौलभ्यमर्चा-

वतार एव पूर्णो भवतिस्वदोष दर्शनप्रयुक्तभयनिवृत्त्यर्थं तद्-वात्सल्यानुसंधानं कार्यं स्वदोषस्य वा तदप्राप्तेर्वा तदाधिक्यस्य वा तदतीन्द्रियत्वस्य वानुसन्धाने आश्रयणयोग्यताभावात् तत्प्रतिकोटिभूता आश्रयणैकान्ताः पुरुषकारभूतया लक्ष्म्योद्भूताः पश्चात्तस्यामेवनाशयन्त्यां "अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणां त्वयि किञ्चित् समापन्ने किं कार्यं सीतया मम" कमलवासिन्यां छिद्रं वदन्त्यामपि मदाश्रा एवं न कुर्युरकुर्वंश्चेत्समीचीनमेवाकुर्वन्निितिवक्तुमुपयुक्ताः, प्रथमाचार्यैः श्रीपराङ्कुशैराश्रयणैकान्तत्वेनातुलगुणः लोकत्रयविशिष्टोमच्चियन्ता श्रीवेङ्कटेशइति वात्सल्यादिक्रमेणानुसंहिताश्चत्वारो गुणाउक्ताः। ईश्वरस्याश्रयणीयतायामाश्रयणसौकर्यमात्रेण नालं संसारभयभीतस्य भगवत्प्राप्तिरुचिबलेनोत्थाप्यस्यास्याधिकारिणः संसारसम्बन्धच्छेत्तुं भगवदनुभवजनितकैङ्कर्यं दातुं चैकान्ताः स्वभावविशेषा अपेक्षिताः तस्माद् विरोधिनिवृत्तिपूर्वकप्राप्यसिद्धिरेकान्ता अहं शब्दोक्ताः ज्ञानशक्त्यादिगुणाश्चत्वारस्तदतिशयादिकाः दयाचास्मिन्पदेऽनुसन्धेया आश्रितानां हितं ज्ञातुं सर्वज्ञतापेक्षिता। ज्ञातप्रकारेणकार्यं कर्तुं सर्वशक्तित्वमपेक्षितम्। शक्तत्वेप्येतद् विषयेकिञ्चिदपेक्षां विना स्थातुमवाप्तसमस्तकामत्वमपेक्षितम्।

तत्रत्वेऽपिस्वफलत्वेनाध्यवस्यकार्यं कर्तुं सर्वस्वामित्वमपेक्षितम् । अनादिकालं कर्मानुगुणं ज्ञात्वानुभावयितुमुपकरणीभूतानामेतेषांरक्षणोपयोगार्थं दयापेक्षिता । तस्मात् सौशील्यादिगुणचतुष्टयं ज्ञानशक्त्यादिगुणपञ्चकम विशेषेणास्मिन्पदेऽनुसन्धेयम् । ननुभगवतस्स्वरूपरूप गुणविभूतिनामव्यवहितवाचकत्वे सत्ययं नारायणशब्दः रूपादिकं विहाय गुणजातावपि गुणैकदेशानां वाचको भवतीत्यत्र निर्णायकप्रमाणंकिमिति चेन्न । एतेषां सर्वेषां वाचकत्वेऽपि प्रपद्य इत्याश्रयणप्रकरणत्वात् गोवलीवर्दन्यायप्रकरणेनाश्रयणैकान्ता गुणविशेषा एवोच्यन्ते । रत्नमञ्जूपिकायां लोकेविद्यमानानां सर्वेषामाभरणानां स्थापनेऽपि स्वेषां स्वेषां तत्तत्कालेष्वभिमतान्याभरणान्यादाय प्रसाधयन्ति । तथास्य सर्वार्थानांवाचकत्वेऽपि तत्तत्कालेऽपेक्षिता अर्थविशेषा विनियुज्यन्ते, न तु सर्वे अर्थास्तस्मात् सर्वेऽर्था बोधनीया इति नियमो नास्ति । अन्यथा ईश्वरस्योपायोपेयत्वरूपविभागो न स्यात् । समस्तकल्याणगुणानामाश्रयत्वेऽपि उपायत्वैकान्तस्वभावविशेषाएव तस्मिन्ननुसन्धीयन्ते । नत्वेकाश्रयत्वमात्रेण भोगैकान्तगुणवाच्यभूते तस्मिन्नेवमनुसन्धाने कृते वाचकभूतोप्ययंशब्दस्तथैव भवति । गोवलीवर्दन्यायो नाम-प्रयोजक वृद्धेन प्रयो-

ज्यवृद्धं प्रतिगाव आनीयन्तामित्युक्ते तादृशगोत्वजाते-
र्वृ'षभेऽपिसत्वात् वृषभान् गाश्चानयेत् तदा क्लीवर्दास्ति-
ष्यन्त्विति विशेषविधानेनवृषभान् विहाय गवामानयनम् ।
तथायमपिसर्वेषां वाचकत्वेऽपीदानीं प्रकरणबलेनैतद्गुण
विशेषाणामेववाचको भवति अथ चरणशब्दार्थः । एवं
नारायणपदं नारशब्देन "नारशब्देन जीवानांसमूहः प्रो-
च्यते बुधैरितिप्रकारेणप्राप्तान् प्रत्यगात्मन उक्त्वा अयनश-
ब्देन इण् गताविति धातुनिष्पन्नतया" संसारार्णवमग्नानां-
विषयाक्रान्तचेसां । विष्णुपोतंविनानान्यत् किञ्चिदस्ति प-
रायणमिप्युक्तप्रकारेणोपाय वाचकं भवति । एवं नाराय-
णपदं सर्वेश्वर एव सर्वात्मनांसंसारनिस्तरणादीनां साधन-
भूतइत्युक्त्वातादृशसाधनसमाश्रयणार्थं सौशील्यादिगुण-
चतुष्टयं कार्यकरत्वार्थंज्ञानशक्त्यादिगुणपञ्चकं प्रतिपाद-
यति । अनन्तरं गुणविशेषविशिष्टस्याश्रयणीयवस्तुनः शु-
द्धेन मनसा ग्राह्यः "स्वप्नधीगम्यं सहैवसन्तं न विजानन्ति
देवाः यमात्मा न वेद ऐन्द्रियज्ञानविषयो न भवतीत्युक्तप्र-
कारेणैन्द्रियकज्ञानगम्यत्वाभावात् दर्शनेनविनाश्रयितुमश-
क्यत्वात्आश्रयणसौकर्याय तद्वस्तु प्रकाशकं पूर्वोक्तसौल-
भ्यरूपात्मगुणफलभूतप्रकाशं विलक्षणविग्रहं प्रकाशयति ।
चरणाविति पदं स्वरूपस्य च स्वरूपाश्रयणगुणानां चाविशे-

पेण शुद्धसत्वमयाप्राकृतदिव्यसंस्थाने सुवर्णमात्रे माणिक्यवत् प्रकाशमानत्वात । तच्च रूपं न संदृशेतिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चनैनं, नमांम चक्षुरभिवीक्ष्यते तं अपश्यन्तः पररूपमित्युक्तपररूपवन्नभवति, विभवार्चारूपत्वा. दाश्रयणैकान्तंभवति । यद्वा नारायणपदोक्तप्रकारेणेश्वरो गुणद्वारेचविग्रहद्वारा चोपायभूतो भवतीति विग्रहस्य स्वतन्त्रोपायत्वं ज्ञापयितुं प्रत्येकंविग्रह उपादीयते । चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणी निरुच्छ्वासतयामुक्तिं गतान्या गोपकन्यका । प्रसादपरमौ नाथौ ममगेहमुपागतौ, धन्योऽह मर्चयिष्यामीत्याह माल्योपजीवन इत्युक्तप्रकारेण वामदक्षिणहस्तपरिज्ञानरहिताया गोपिकाया भोग्यस्य पुण्यस्य विक्रयेणस्वोदरपोषकस्य मालाकारप्रभृतेः "परमात्मनि योरक्तो विरक्तोऽपरमात्मनीतिप्रकारेण स्वविषये निरतिशयप्रावण्यमुत्पाद्यते नेवहेतुनेतर विषयविरक्तिं चोत् पाद्यविग्रहः स्वयमेव सर्वं सम्पादयति । ननुविग्रह एवोपायभूतश्चेद्विभवार्चारूपाणि पश्यतां भगवद्विषये प्रावण्यं कुतो नजायते इति चेन्न। सर्वेषां दर्शन सत्वेऽपि विषयो सौन्दर्यानाविष्करणादन्यपरा भवति, नतु विग्रहस्य तादृशस्वभावराहित्यात् । अतएव सौन्दर्यसौशील्यादिगुणाविष्कारेणाक्रूरमालाकारादिकान परमभागवतान् कृत्वे-

तिभाष्यकारै रप्युक्तं । एवमुक्तगुणानां प्रकाशकतया स्व-
तन्त्र साधनतया वा विग्रह उपादीयते । ननु साक्षाद् वि-
ग्रह वाचकशब्देर्नविग्रह मनुक्त्वा चरणशब्दार्थभूताभ्यां
चरणाभ्यामुपलक्षयितुं कोहेतुरिति चेन्न । अत्रोपायतया-
स्वीकर्तु रधिकारिणः मूलमन्त्रसुशिक्षितस्वरूपत्वात् शेषत्व-
प्रकाशकै तद्व्यवहारव्यतिरिक्तव्यवहारानभिज्ञत्वात् स्तनं-
धयस्य मातुः सर्वावयवस्योद्देश्यत्वेऽपि स्तने विशेषप्राप्ति-
वत् अस्य चरणयोर्विशेषसम्बन्धसत्वाच्च चरणाभ्यां विग्रह
उपलक्ष्यते । एवं पदत्रयेण तद्गतमुक्तं उपरि पदाभ्याम-
धिकारिगतमुच्यते । अथ शरणंशब्दार्थः तत्र शरणशब्देन
उपाये गृहरक्षित्रोः शब्दः शरणमित्ययंवर्तते साम्प्रतं चैष
उपायार्थैकवाचकः इत्युक्तप्रकारेणोपायार्थवाचकत्वात्,
श्रिया सार्द्धमास्ते सोश्नुते सर्वान् कामान्सदापश्यन्ती-
त्युक्त प्रकारेण प्राप्यकोट्यन्तर्भूतस्य पूर्वोक्तश्रीमत्त्वस्य
नारायणशब्दोक्तगुणविशेषाणामनन्तरोक्तदिव्यमङ्गलवि-
ग्रहस्य चोपेयव्यावृत्तिरुच्यते । प्रपद्ये इति पद्गताविति-
धातुनिष्पन्नतया गत्यर्थत्वात् गत्यर्था बुद्ध्यर्था इति ज्ञान-
विशेष उच्यते । स च ज्ञानविशेषः अहमस्म्यपराधानामा-
लयोऽकिंचनोगतिरित्युक्तप्रकारेणस्वाकिंचन्याद्यनुसंधानपू-
र्वकप्रार्थनामतिः याञ्चाप्रपत्तिरितिप्रकारेण प्रार्थनागर्भः,

त्वमेवोपायभूतो मे भव तदेकोपायतोयां चेति प्रकारेण स्वयमुपायशरीरानन्तर्भूतः उपायस्वीकारात्मकतयोपेय शरीरानन्तर्भूतोधिकारिविशेषणभूतो महाविश्वासात्मकः प्रतिपत्तिविशेषः। प्रपद्य इति उत्तम पुरुषत्वात् पूर्वोक्त विषयमुपायतया स्वीकरोति स्वानुष्ठानरूपम्। यद्वा गते-र्व्यापाररूपत्वात् मानसगतिर्वाचिकगतिः कायिकगतिश्चो-च्यते। मानसगतिर्नामोपायत्वेनाध्यवसायः, वाचिक गति-र्नामराघवं शरणंगतः चरणयोरधः प्रविष्टोस्मि हे,नारायण हे मणिवर्ण हे नागशायिन्नागच्छ द्वयवक्तेत्यादिप्रकारेण वाचारचेति प्रार्थनम। कायिकगतिर्नाम—अञ्जलिः परमा-मुद्राक्षिप्रं देवप्रसादिनीत्युक्तप्रकारेणभगवत्प्रसादहेतुभूतां-जलिप्रयोगः। किं च निषादकाकादिवद्रक्षकरूवस्तुनि-वासस्थलं प्रत्यागमनं वा। अतएव बद्धाञ्जलिपुटंदीनंया-चन्तं शरणागतमिति चातुर्विध्यमुक्तम्। एतच्चतुर्विधस्या-प्येकोश्रयवृत्तित्वेऽधिकारिपूर्तिः प्रकाशते। एतेष्वन्यतम-सत्वे भगवद्वैभवः प्रकाशते। अत्रेदृशोहमध्यवस्यामीति जातिगुणवृत्तादिभिरधिकारिणोऽविशेषितत्वात्, एतत् प्रप-त्यनुष्ठानं सर्वाधिकारमिति ज्ञायते। किन्तु रुचिरेवापेक्षि-ता रुचिमात्रस्यापेक्षितत्वादेव रावणो नामदुर्वृत्त इत्यारभ्य-स्वनिष्कर्षादिकं सर्वमपि स्ववाचोच्यते। रावणस्यानुजो-

भ्राता विभीषण इति श्रुतः, चतुर्भिः सहरक्षोभिर्थवन्तंश-रणं गत इति पार्श्वस्थैरपि न्यूनतामुक्त्वाऽधिक्षेपः क्रियते तदुपरि वध्यतामित्युक्तिः एवमपिश्रीविभीषणं रक्षन् स्वाम्यपियदि वा रावणः स्वयमित्याह । तेन घटयन्त्या-मपि लक्ष्म्यांतेन मैत्री भवतु ते यदि जीवितुमिच्छसीत्यु-पदिशन्त्यां न नमेयमिति प्रतिज्ञां नात्यजत्। अस्मिन्पदे-ऽध्यवस्यामीत्यध्यवसायात्मकज्ञानस्याश्रयभूतमधिकारि-स्वरूपमनुसन्धेयम् । तच्चमूलमन्त्रे पदत्रयेणाप्युक्तमाकारत्र-यमेवमनेनपदेनसकलसांसारिकविधूननपूर्वकनिरस्तातिश-याह्लादसुखभावैकलक्षणस्वानुभवानन्दवैभवं दातुमनादि-कालमवसरं प्रतीक्षतोऽस्यवैमुख्यवैभवेनप्रतिहतशक्तिकस्या-लब्धरक्षणावकासस्य रक्षापेक्षां प्रतीक्ष्यत इत्युक्तप्रकारेण-स्वक्षणावकाशरूपश्चैतन्य प्रयुक्तः श्यामत्व युवत्ववदधिकारि-विशेषणभूतोऽधिकारिनियमानपेक्षत्वादायासः स्मरणेको-स्येतिस्मरणमात्रत्वादनायासः। यथा तथावापीत्युक्ततया-प्राङ् मुखत्वादिनियमानपेक्षः । सकृदेवप्रपन्नायतवास्मीति च याचते इत्युक्तप्रकारेण सकृत्करणरूपत्वात् असकृदावृ-त्तानपेक्षः, अधिकारि नियमापेक्षेभ्यो अत्यायाससाध्येभ्यः प्राङ्मुखत्वादिनियमापेक्षेभ्योऽसकृदावृत्तिरूपेभ्यः कर्मज्ञा-नादिभ्यो व्यावृत्तः आकिञ्चन्यसहकारिकः । चापमानयेत्य-

त्रपर्यवसन्नभगवत् कृत समुद्रविषयकशरणागतिर्वैलक्षण्ये-नाधिकारिणः साक्षादकिंचनत्वाद्विषयस्य सर्वसमाश्रयणी-यत्वाच्च फलव्यभिचाररहित उपायाध्यवसायः स्वानुष्ठान-विषयः क्रियते। नन्वयमुपायो वेदान्तेषु सकलसाधना-धिकत्वेन देवानां गुह्यमित्युक्तप्रकारेण देवरहस्यत्वेन च प्रतिपादितः खलु। ततः कर्मादिवद्वाधिकृताधिकारोन-भवति किम्, वेदान्तसिद्धस्यास्याधिकृताधिकारत्वाभावे कर्मज्ञानादिरप्यधिकृताधिकारो न स्यात्। अन्यथा कर्म-ज्ञानादिरिधिकृताधिकारोऽयं तु न तादृश इत्यत्र किंप्रमाणं मिति चेन्न। सतु त्रैवर्णिकाधिकारो भवति, अग्नि विद्याङ्ग-कत्वात्। एवमग्निविद्याङ्गककर्मापेक्षत्वात् ज्ञानादीन्यपित्र-धिकृताधिकाराणि भवन्ति, न तु शास्त्र सिद्धत्वात्। अ-न्यथा शास्त्रसिद्धेषु पाकयज्ञ नामसंकीर्तनादिषु स्त्रीशूद्रा-दीनामन्वयो न स्यात्। निषादः कपोतं शरणं न गच्छेत् काक विभीषणादयश्चक्रवर्तिकुमारं शरणं न गच्छेयुः। अथ चक्रवर्तिकुमारः समुद्रशरणागतिसमये ''ततः सागर-वेलायां दर्भानास्तीर्य राघवः। अञ्जलि प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेरितिप्राङ्मुखत्वादि नियमयुक्तः शरणं-गत इत्युक्तम्। एवंसतीयंप्रपत्तिर्नियमानपेक्षेति कथमिति चेन्न। चक्रवर्तिकुमारविषये विभीषणेन शरणागतिकरण-

समये त्वां तु धिक्कुलपांसनामितिरावणोपेक्षाकालमेव- कालत्वेन स्वीकृत्य समुद्रोपरि आगमनसमये स्नानाचमनादिकमपि विना स्वयं यथावस्थएवशरणं गत इत्युक्तत्वान्नियमापेक्षेति वक्तुं न शक्यते। तस्मात्सन्ध्यावन्दनादिवत्त्याज्यमपिभवति । शिखा यज्ञोपवीतादिवत् स्थितमपि भवतीति नियमोऽनुष्ठानद्वयेऽपि प्रकाशते। ननु सकृदेवप्रपन्नायेति प्रकारेण सकृत्करणस्य पर्याप्तावसकृदावृत्तोपासनात्मक ज्ञानवदेतदध्यवसायात्मकज्ञानमपि- प्रपद्य इति वर्तमानेन तैलधारावदविच्छिन्नं भवतीति ज्ञायते। तदासकृदेवेति सकृत्करणस्यास्य वर्तमानस्य च कथं संगतिरिति चेन्न। सकृदेवेति भगवद्विषयीकारस्य सकृत् करणमेवालमिति प्रकाशयति। वर्तमाननिर्देशोयावच्छरीरपातं कालक्षेपापेक्षयाभिमतफललाभ त्वरया चानुवर्तत इत्यर्थं प्रकाशयति । यावच्छरीरपातमनुष्ठानेऽपि प्राप्तव्य फलस्य गौरवे दृष्टे सकृदिति वक्तुमयोग्यमिति गोविन्दाचार्यैरुक्तम् । यद्वा सहसाशब्दस्य सकृदादेशं कृत्वा सकृदेव प्रपन्नायेत्युक्तम् इति कूरशैरुक्तोयमर्थः। संसारभयातिशयेन भगवद्विषये रुच्यतिशयेन च श्रद्धया शरणं यदि आजगाम मुहूर्तेनेति चोक्तप्रकारेणत्वरायुक्ततया आश्रयणम् । एवंपूर्वार्धेन अध्यवसायात्मकज्ञानविशेषः तस्यो-

पेयाध्यवसायाद् व्यावृत्तिः । तस्योपायस्य साध्योपायाद्-व्यावृत्तिः । तं सिद्धोपायमवलम्बतोऽधिकारिणः पूर्वापराभ्रमयनिवर्तकपुरुषकारविशेषश्चोक्तः । अथोत्तर खण्डार्थारम्भः । अनन्तरमत्रस्वीकृतसिद्धोपायस्य" तावदार्तिस्तथा वांच्छा तावन्मोहस्तथा सुखम् । यावन्न याति शरणं त्वामशेषाघनाशनम् "इत्यार्तादीनांच तुर्विधाधिकारिणां साधारणत्वात् । एतेषु पूर्वमुपायं स्वीकृत्य वर्तमानोऽधिकारीकीदृशः इत्यपेक्षायां" मुमुक्षुर्वै शरणमहंप्रपद्ये ब्रह्मणोमहिमानमाप्नोतीत्युक्तप्रकारेण फलविशेषप्रार्थनारूपाध्यवसायेन इमं विशेषयत्युत्तरार्द्धः । एवं पूर्वार्द्धेनोपायप्रार्थना कृता, उत्तरार्द्धेन तत्फलभूतमुपेयं प्रार्थ्यते । ननु उपायप्रार्थनं नाम स्वेष्टानिष्टप्राप्तिपरिहारयोः त्वमेव साधनं भव इत्यपेक्षा यथा स्वर्गकामतया ज्योतिष्टोमादावधिकरोति, एवं प्राप्यं इष्टमेतत् परिहार्यमनिष्टमेतदिति निश्चयोत्पत्यनन्तरं खलु तदनुगुणोपायस्वीकारेऽधि करोति । एवं सति किं प्राप्यापेक्षाधर्मार्थादिप्राप्यान्तरेभ्यः व्यावर्तयितुं क्रियते उत् उपायतया स्वीकृतस्य प्राप्यविशेषपरिज्ञानार्थं, आहोस्वित्प्राप्यविशेषप्रार्थनां विना तं न ददातीति उपायस्वीकारपूर्वभाविना मुमुक्षुत्वेन धर्मार्थकामेभ्यो व्यावृत्तिसिद्धेः । स्वीकृतोपायस्य सर्वज्ञत्वात् । स्वीकृतस्य सर्वज्ञस्य

प्राप्यापेक्षाप्रतीक्षयाप्रयोजनाभावाच्च। उपाय स्वीकारं विना प्राप्यापेक्षा न कार्या। अथ प्राप्यंदातव्यमित्यपेक्षा प्राप्यापेक्षेतिचेत्, उपाय स्वीकारस्यपूर्वार्द्धस्य नैरर्थक्यम्। तस्मात्पूर्वार्द्धानुसन्धानं वा उत्तरार्द्धानुसन्धानं वा कर्तव्यम्। उभयानुसन्धाने पौनरुक्त्यंस्यादिति चेन्न। पूर्वार्द्धानुसन्धानमात्रेणोपेयलाभस्यार्थत्वेऽपि अध्यात्मयोगाधिगमेन देवं मत्वाधीरो हर्षशोकौजहाति, तरतिशोक मात्मविदिति मुमुक्षोः फलकथनसमयेशोक निवृत्तिमात्रं पुरुषार्थ इत्युच्यते। तस्यतावदेवचिरंयावन्न विमोक्ष्ये अथ सम्पत्स्ये इति देह विमोचनमात्रं पुरुपार्थ उच्यते। विज्ञानसारथिर्यस्तुमनः प्रग्रहवान्नरः सोध्वनः पारमाप्नोतितद्विष्णोः परमंपदमिति कस्याचिद्देशविशेषस्य प्राप्तिपुरुषार्थ इत्युच्यते। एष संप्रसादोस्माच्छरीरात्समुत्थाय परंज्योतिरूपं संपद्य स्वेनरूपेणाभिनिष्पद्यतेइति स्वरूपप्राप्ति पुरुपार्थ उच्यते। निरञ्जनः परमं साम्यमुपैतीति परमसाम्यापत्तिः पुरुपार्थ उच्यते। एतमानन्दमयमात्मानमुपसंक्रामतीति भगवत् सामीप्यं पुरुपार्थ उच्यते, सोश्नुते सर्वान् कामान् सहब्रह्मणाविपश्चितेति भगवद्गुणानुभवः पुरुपार्थ उच्यते, विज्ञानमानन्दो ब्रह्मयोनिः रसंह्येवायं लब्ध्वानन्दीभवतीति भगवदनुभवजनितः परमानन्दः पुरुपार्थ उच्यते, येनयेनधाता गच्छति

तेन तेन सह गच्छतीति भगवदनुवृत्ति रूपं कैङ्कर्यं पुरुषार्थ उच्यते, एवं पूर्वोक्तशोकनिवृत्त्यादीनि पुरुषार्थत्वेन प्रतिपाद्यद्भिः वाक्यैश्चरमपुरुषार्थ निष्कर्षानुपपत्तेः। तादृशपुरुषार्थविशेषं प्रकाशयितु मुत्तरार्द्धोदयात्, उपायस्वरूपविशेषप्रत्यायकतया पूर्वार्द्धोदयाच्च पौनरुक्त्यं नास्ति। उपेयतयावरणं उपायतयावरणं चोभयोः कृत्यम्। उपेयतया वरणसमयेउपायापेक्षास्ति, उपायतयावरणसमये उपेयापेक्षास्ति। अत उभयमप्यपेक्षितं स्यात्। उपेयतयावरणंनाम ईश्वर श्रीचरणयोः कैङ्कर्यमेव उपेयमित्यध्यवसायः। उपायत्ववरणं नाम तच्चरणौ उपायः इत्यध्यवसायः। अध्यवसाय द्वयं च अस्याधिकारिणोऽपेक्षितम्। अनन्य साधनत्व सिद्ध्या उपायाध्यवसाय आवश्यकः। अनन्यप्रयोजनत्व सिद्ध्याउपेयाध्यवसायः आवश्यकः। उपायविशेषाध्यवसायस्यप्रयोजनान्तरपरे च सत्वात्। तद् व्यावृत्तिसिद्धये उपेयाध्यवसायोऽयेक्षितस्साधके उपेयाध्यवसायस्य सत्वात्, तद् व्यावृत्तये उपायाध्यवसायोऽपेक्षितः। साधकः स्वयमिष्टं मनिषाण अमुम्मनिषाण सर्वस्मनिषाणेति उपेय विशेषमपेक्षित्वास्थितः, दैत्य सैन्य पराजिताः, शरणं त्वामनुप्राप्ता इति प्रयोजनान्तर परस्यापि उपायाध्यवसायोस्ति। तद्व्यावृत्तिसिद्धये अन्तरिक्षगतः श्रीमान्, सतु ना-

गवरः श्रीमोनित्युक्त प्रकारेणोपायोपेयाध्यवमायरूप महदैश्वर्यस्यास्याधिकारिणोऽपेक्षितत्वात् । तद्द्वयमपिवाक्यद्वयेनोच्यते । अतएव मुमुक्षुर्वैशरणमहंप्रपद्य इतिश्रुतं भवति, पूर्वं प्रपद्य इति स्वीकृतस्यो पायस्य फलं कैङ्कर्यमपेक्षमाणेन तस्य च प्रतिमम्बन्धिविशेषाधीनत्वात् स च प्रति सम्बन्धीपूर्तिपूरणपूर्वकमनुसन्धीयते, तत्र श्रीमते इति पदं कैंकर्यप्रतिसम्बन्धिनंपूरयति । एकस्य मिथुनस्य शेषत्वप्रतिसम्बिन्धित्ववत् कैंकर्यप्रतिसंबंध्यपि मिथुनमेवभवति । तस्मात् महा लक्ष्म्या नित्यसंयुक्तायेत्युक्तम् । वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सहेत्युक्त प्रकारेणैका विभूतिः सर्वापि मिथुनभोगपरा भवति । तस्मादेव हि तत्समुदायाद् विश्लिष्यानुगम्यदास्यं कर्तुं आगता अपि "भवांस्तु सह वैदेह्या गिरि सानुषु रंस्यते, अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च त इत्यवदत् । तादृश बालस्वामीवत्दास्यं कर्तुमागावन्तोऽपि अलङ्कारभूतं श्रीमहालक्ष्मायुक्तं त्वां प्राप्नुयामित्यवदन् । युवा कुमारः एषभाभिनिरितिवत् प्रतिपाद्यमानान् पुंसांदृष्टिचितापहारिणस्तद्विग्रहसौन्दर्यं शीलादिगुणगणांश्च प्रथमतोऽनुभवति । अनुभावित्री सापराजिताभवति । तस्याश्चैकस्मिन्नवयवे

वगाह्यनिमज्य कमलवासिन्याः भोग विह्वलः स च उन्मत्तो भवतीति भ्रांतमिथुनं यदात्यन्तविह्वलंभवति तदा शिशिरोपचारकरणं व्यजनादिवीजनं पतद्ग्रहधारणं एवमादिमिथुनविषयेक्रियमाणं कैङ्कर्यं भवति। तस्मादेक मिथुनमेव प्राप्यम्। अत्रान्यतरस्य प्राप्यत्वेन स्वीकारः विनाशेपर्यवस्यति। पृथक्करणादेव हि भगिन्या नासिकाछिन्ना, भ्रातुश्चशिरश्छिन्नम्। परिमलेनपुष्पस्यश्लाघ्यतेवतेजसामाणिक्यस्यश्लाघ्यतेव चानया तस्याधिक्यम्। श्रद्धया देवो देवत्वमश्नुत इतिश्रूयते शेषिणोऽतिशयकरणं हि शेषवस्तुनः कृत्यम्। अनया तस्याधिक्यं नाम विष्णुपत्नी विष्णोः श्रीरित्युक्तप्रकारेणात्रशेषत्वं प्रकाशत इति अनेन श्रीशब्देन कैङ्कर्यप्रतिसम्बन्धितया मुक्तनित्यादिभिस्सेव्यत इत्याकारः, स्वभोगसौख्येन तं सेवतइत्याकारश्च ज्ञायते। अनेन पदेन महालक्ष्मीः सर्वेश्वरश्चेत्युभयोः सहावस्थाने कैङ्कर्यं कुर्यामित्यर्थविशेष उक्तः। कैंकर्यस्य चानुभवजनित प्रीतिनिदानत्वात् अनुभवजनितप्रीतेरनुभाव्यविषयाधीनत्वाच्च तस्यकैङ्कर्यस्यनिदानभूतायाः प्रीतेरुत्पत्तिभूमिभूतस्वरूपरूपगुणपूर्तिं रुच्यते नारायणपदेन" अश्नुतेकामान् लब्ध्वानन्दीभवति, इमांल्लोकान् संचरन् सदापश्यन्तीत्युक्त प्रकारेण स्वरूपरूपगुणाद्यनुभवः प्रीतिहेतुः स्यात्। प्रीतिकैङ्कर्य-

हेतुः स्यात् । अन्यथा श्रीमत इत्यत्र चतुर्थ्येवालं कैंकर्यप्रकाशनस्य नारायणपदस्य वैयर्थ्यापत्तिः । अतः स्वरूपरूप गुणविभूतीनां चतुर्णां वाचकत्वात् अनुभाव्य विषयपूर्तिं प्रकाशयति नारायणपदं, नारपदं रूपगुणविभूतीनां वाचकं भवति । अयनपदमेतेषां त्रयाणां आधारभूतं स्वरूपंवदति तच्चस्वरूपं सत्यं ज्ञानमनन्तं ब्रह्मेति । अचितोत्यन्त व्यावृत्तत्वात् त्रिविधात्मस्वरूपात् अत्यन्तव्यावृतंभवति रूपं च न भूतसंघसंस्थानो देहोऽस्यपरमात्मन इत्यप्राकृतत्वात्, अस्त्रभूषणाध्यायेषु उक्तप्रकारेण सकल जगदाधारत्वाच्च । प्राकृतेभ्यः आधेयेभ्यः सर्वचेतनशरीरेभ्योऽधिकंभवति । अपहतपाप्माविजरोविमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः यः सर्वज्ञः सर्वचित्ज्ञानशक्तिबलैश्वर्यवीर्यं तेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः सुवीर्यशक्त्यादिगुणैकराशिः परः पराणां सकलान यत्र क्लेशादयः सन्तीत्युक्तप्रकारेण हेयगुणासंसृष्टत्वात्, यतोवाचोनिवर्तंतेइति निस्सीमत्वात् नेति नेति, इत्युक्त प्रकारेण परिच्छिन्नत्वाच्च कल्याणगुणा अपिहेयगुणसंसृष्टेभ्यः परिच्छिन्नेभ्यः सर्वचेतनगुणेभ्योऽधिकाभवन्ति । यस्य छायामृतं यस्य मृत्युः पादोस्य विश्वाभूतानि त्रिपादस्यामृतंदिवीत्युक्त प्रकारेणोभय विभूतेरपि विभूतिकोटि-

घटितत्वात्परिच्छिन्न विभूतिभ्योऽधिकाभवन्ति । एवं सर्व-प्रकारेणापि सर्वाधिकस्य पतिं विश्वस्य पतिंपतीनां इत्यादि श्रुतिषु उक्तप्रकारेणसर्वस्वामिनः सर्वेश्वरस्य नारायणश-ब्देन कैंकर्यप्रतिसम्बन्धितयोक्तत्वात् । सर्वंपरवशंदुःखं सेवाश्ववृत्तिर्व्याख्याता परप्रेष्याभावादित्यादि वाक्योक्त सेवानिषेधो सेव्यसेवानिषेधपरः । अन्यथा तदुपासितव्यं तदन्वेष्टितव्यंतद्वा विजिज्ञासितव्यं सोन्वेष्टव्यः, आत्मानमेव-लोकमुपासीत, कारणं तु ध्येयः, स वै वेदितव्यः, ध्येयः सदा ध्येयो नारायणः सदा, वासुदेवतरुच्छाया नातिशीतान घर्मदा नरकांगारशमनी सा किमर्थं न सेव्यत इति भगवत् सेवाविधायक वाक्यैर्विरोधः स्यात् । पतिव्रतायाः पुरुषान्त-रस्पर्शो हि त्याज्यो नतु स्वभर्तुः स्पर्शः । अनन्तरं नारा-यण इतिपदंभगवत्स्वरूपरूपगुणविभूत्यादीननुभूय तदनु-भवजनितप्रीतिप्रकर्षेप्रेरयति । हावुहावुहावु अहमन्नमहम-न्नमहमन्नं, येनयेनधातागच्छति तेन तेन सहगच्छति सम-र्पयितुं, परिशुद्धसमाचीनमाला घृत्वेत्यादिपूक्तप्रकारेण-विरोधिनिवृत्तिपूर्वकं कस्मिंश्चिद्देशविशेषे गत्वा वाचिकः कायिकश्च क्रियमाणः किञ्चित्कारः प्रार्थ्यते । आयेति च-तुर्थ्या अभिमतलाभस्य विरोधिनिवृत्तिंविनानुदयात् । अत्र क्रियमाणकैंङ्कर्यपेक्षयाविरोधि निवृत्तिश्च प्रार्थ्यते । उभय-

ग़प्यपेक्षितं चेत् उभयोरपि प्रार्थनां विना कैंकर्यमेवकिमिति-प्रार्थ्यतइति चेत्। कैङ्कर्यसिद्धिरेवपरमप्रयोजनं, तत्प्रतिबन्धकत्वाद्विरोधिनिवृत्तिरपेक्षिता। जरामरणमोक्षार्थं प्रवृत्त केवलवत् स्वयमुद्देश्यत्वाभावात्। एतत् प्राधान्यस्य द्योतनार्थं शब्दतस्तदबोधनं। स तु विरोधि निवृत्तिं स्वयं प्रयोजनंमनुते। अयं कैङ्कर्यविरोधितया त्याज्यमिति जानाति। संसारभयमेवहि तस्य भगवत्प्रावण्यमस्यैव हि चरमश्लोके विरोधिनिवृत्तेः प्राधान्येन कथनं स्वयमुद्देश्यतया नभवति आत्मनः स्वाभाविकस्य कैङ्कर्यस्य प्रकाशे मध्ये तिरोधान निवृत्तिरेवापेक्षितेत्यभिप्रायेण। इत्थं चतुर्थीतादर्थ्ये चतुर्थी अस्याः शेषत्ववाचित्वेऽपि पूर्वकृतायाः प्रपत्तेः शेषत्वमात्रस्यफलत्वाभावात्। अकिञ्चित्करस्य शेषत्वानुपपत्तिरित्युक्तप्रकारेण शेषत्वफलभूतांशेषवृत्ति वदति। यथा ज्ञानाभावेस्वरूपमसन्नेव भवति। यथा वा अनुष्ठानाभावे तच्च ज्ञानमसन्नेव भवति एवं शेषवृत्यभावे शेषत्वमसत्कल्पं भवति। अतएव मकारस्योत्तरचतुर्थी विवरणंभवति। अत्र शेषत्वेसिद्धेऽपि देशविशेषगमनं शेषवृत्तिसिद्ध्यर्थमेवहि। उपायस्वीकारात् प्रागेवशेषत्वज्ञानमस्ति। अतएवमूलमन्त्रानन्तरं द्वयंभवति। अतः शेषत्वज्ञानं प्राग्भवति, अनन्तरमुपायस्वीकारः कर्तव्यः। एवञ्च अर्थार्थी राजकुलंगच्छेत्म-

न्दाग्निर्नाम्बु पिबेत् ज्योतिष्टोमेन स्वर्गकामोयजेतइतिवत् उपेयापेक्षावत उपायानेवोत्पत्तेः, सत्तराद्ध स्यपूर्वत्वं पूर्वा-र्द्ध स्योत्तरत्वञ्चस्यादिति चेन्न । व्युत्पत्तिदशायामेव मनुष्ठा-नदशायां त्वेतद्वैपरीत्यमेव । ज्योतिष्ठोमानुष्ठानानन्तर-मेव हि स्वर्गसिद्धिः । एव मनया चतुर्थ्याशेवत्वोपपादि-काशेषवृत्तिःप्रार्थ्यते । इयं प्रार्थना रूपेत्यत्र किं प्रमाण-मिति चेन्न । पूर्वमुपायस्वीकारकर्तुर्लब्धाभिमतत्वा भावात् । अभिमतफललाभ दशाभावाच्च । एतदर्थं विवरण कृद्भिर्भाष्यकारैः भवानीति प्रार्थितत्वात् । प्रथमाचार्यैः परांकुशैःदास्यं कर्तव्यमिति प्रार्थितत्वाच्च प्रार्थनारूपा भवति । तस्मात् कैङ्कर्यप्रार्थनाबोधकमेतत्पदं नाशरहित कालेषुसर्वेषु सहैव स्थित्वानिरवच्छिन्न दास्यं कर्तुं प्रा-र्थयेदितिकैङ्कर्य विशेषणत्वेन उक्तैः सर्वकालादिशब्दैस्ता-दृश कैङ्कर्यप्रकारं वदति । सर्वकालशब्देन न च पुनरावर्तते न च पुनरावर्तते, अनावृत्तिशब्दादनावृतिशब्दात् इत्युक्त-प्रकारेण यावदात्मानुभाव्यभोगः प्रार्थ्यते । अनेन गतागतं कामकामा लभन्ते गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो-ग्रहाः इत्युक्तप्रकारेण देशान्तरेद्रव्यमार्जयित्वादेशान्तरे वि-नियुज्य जीवित्वा व्ययानन्तरं देशान्तरं यथा गच्छत्येव मत्रार्जितं पुण्य मनुभूयभोगावसानेअर्थतमाकाशं आकाशा-

द् वायुः वायुर्भूत्वा धूमो भवतिधूमोभूत्वाभ्रं भवति अभ्रं-भूत्वामेघोभवति मेघोभूत्वा प्रवर्षतीत्युक्तक्रमेण पुनरावृत्ति लक्षणस्वर्गाद्यैश्वर्यभोगाद्व्यावृत्तिरुक्ता । सर्वदेशशब्देन-दिव्यदेश श्रीमहामणिमण्डपदिव्योद्यानादिषु परमपदे-भोगस्थानेषु आमोदप्रमोदसंमोदरूपेषु व्यूहस्थानेषु लीला-विभूतौ व्यूहविभवार्चावतारस्थानेषु चाविशेषेण तस्य सर्वेषु लोकेषु कामचारो भवति। इमांल्लोकान्कामान् नीकामरूप्यनुसंचरन् इत्युक्त प्रकारेण देशपरिच्छेदरहितं दास्यं कुर्यामित्युच्यते । अनेन देशपरिच्छिन्नः केवलस्य भोगो व्यावृत्यते । तथा हिसांसर्गिकशब्दादिविषयानुभवस्य कर्मजनितसंसारवशवर्तिनां ब्रह्मादीनामेव भोग्यतया आत्मानुभवसुखापेक्षया अतिक्षुद्रत्वात् शब्दादि विषये-ष्वन्वयो नास्ति। एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां तत्परमं स्थानंयद् वै पश्यन्ति सूरय इति अनन्यप्रयोजनानां परमैकान्तिनामनुभाव्येऽपरिच्छिन्न भगवदनुभवेऽन्वयाभावात् । अणुपरिमाणआत्मैव भोग्यो भवति । तस्मादात्मानुभवो देशपरिच्छिन्नसर्वावस्था-शब्देन पूर्वोक्तैश्वर्यवत् नाशाभावेन यावदात्मभावित्वेऽपि कैवल्यवत्संकोचाभावेन सर्वदेशानुक्तत्वेनस्थितावपि नित्याग्निहोत्रवत् भोगोपरतिगर्भेषु केषुचित् कालविशेषेषु-

विच्छेदः स्यात् । एवं विना अंतरङ्गदशायां बहिरंगदशायां चाविशेषेणैकस्यापिकालस्यैकस्या अपि कलायाः वन्ध्यात्वं विना दास्यं कुर्यामित्युच्यते । महासदसिस्थितिदशायां महिषीणां च मलयमारुतस्यापिपश्चाद्गमनयोग्यायां सहावस्थानदशायां चाविशेषेणानंतसूरिवद् दास्यं कर्तव्यम् । महासदसि स्थितिदशायां छत्र चामरादिपाणिभूत्वा अन्तरङ्गदशायां पतद्ग्रहशय्यायां लीलाशुकादिभूत्वा अविच्छेदेन दास्यं कुर्वन्वतते । मुक्तः एतेनैकदा आत्मानं वासुदेवाख्यं चिन्तयन्निति स्वानुभववैभवेन श्रीस्तनसंश्लेषानुभवेन "अहमन्नमहमन्नमित्युक्तप्रकारेण परमभोग्यभूत नित्यमुक्तस्वरूपानुभवेन च परमानन्दित्वेन स्थितावपि स एकाकी नरमति, भृशं भवति दुखितः, क्रोधमाहारयत्तीव्र" कोपस्यवशमेयिवान्, इत्युक्तप्रकारेण सूरिवत् स्वेनावर्जनोय सम्बन्धविशिष्टानां चेतनानां करणकलेवरवैधुर्येणस्थितिं दृष्ट्वानुभवस्यकिञ्चित्करत्वेन स्थितिः । करणकलेवर प्रदानेऽपि तापत्रयवशानां दुःखानुभवंजायमानस्तैरेव सान्त्वनं कर्तुं योग्यः क्लेशस्तैः क्रियमाणंभगवदपचारादिकं दृष्ट्वा दयाश्रयीभूतं हृदयं क्रोधाश्रयीकरणं लीलाविभूतिसम्बन्धैकत्रात्यन्तक्लेशएकत्रानन्द इति ईश्वर भोगात् भोगमात्रसाम्यलिङ्गस्य मुक्तभोगस्य व्यावृत्तिरुक्ता ।

सर्वविधशब्देननिवासशय्यासनपादुकांशुकोपधान वर्षातपवारणादिभिः गमने छत्रं भवतीत्युक्तप्रकारेणादरानुरूपं स एकधाभवति द्विधाभवति त्रिधाभवति शतधा भवति सहस्रधाभवतीति प्रकारेणानेकविग्रहपरिग्रहं कृत्वा" अहंसर्वंकरिष्यामीति धाजस्वामी छत्रचामरपाणिर्भवति, खनित्रपिटकाधरोभवति। फलाहरणादीनिकरोति। धनुष्पाणीरक्षति। नगरस्वामिनः परिकरवर्गं यद्यत् करोतितत्सर्वं स्वयमेवकरोति। तथाहमपि सर्वप्रकारं दास्यं कुर्यामिति प्रार्थयते। एतेन केवलस्तनाभ्यां दास्यं कुर्वन्त्याः नित्यानपायिन्याः महालक्ष्म्याः भोगाद्व्यावृत्तिरुक्ता। चेतनस्य स्वरूपं स्वरूपाद् भोगात्किञ्चित्काराच्चाविशेषेणव्यावृत्तं। भगवच्छेषत्वं तस्याः स्वरूपं मिथुनशेषत्वमस्यस्वरूपं भगवद् भोगएवतस्याः तस्यास्तस्य च सहावस्थानेऽस्य भोगः। स्तनतटादिभिः क्रियमाणः किञ्चित्कारस्तस्याः अस्य तु मिथुनविषयः सर्वविधकिञ्चित्कारोऽप्यस्ति। उचितशब्देन सर्वेषु कालेषु सर्वदेशेषु सर्वावस्थासु कर्तव्यं सर्वविधकिञ्चित्करणं च कुर्यामिति संकल्प एवास्यास्ति। अनुष्ठानसमये क्रियतामित्युक्तप्रकारेण तद्धृदयस्य यद्यदनुकूलं तदनुष्ठेयमिति स्वेच्छा व्यावृत्तकैंकर्यमुच्यते। उपानद्वच्चरणयोरधो वर्तते। मालावत् मस्तकमारोहति।

वाज्ञस्वामिवत् सहगच्छति । भगवत्सूरिवच्छिरसि क्रीटं-धतुं योग्यतयावर्तते । इदमेवपारतन्त्र्यस्यसीमाभूमिः यत् प्रति सम्बन्धि मुखविकासस्य कारणं भवति तदेव कैंकर्यम् । एवमनयाबहुकालमारभ्य भोगविरोधिनाक्षयरोगेण-दुःखितः कस्यचित्सिद्धौषधस्य प्राप्त्या दुःखनिवृत्तौयथा स्नाति । तथा भगवत्प्रसादरूपपरमभेषजवैभवेन सांसारिकरूपप्रतिबन्धकनिवृत्तौ निरस्तमलमाणिक्यवदत्युज्व-लोर्चिरादिगत्या परमपदरूपं दिव्यदेशं गत्वा निरन्तर भगवदनुभवैकपात्राणां नित्यसूरीणां संघेऽन्यतमोभूत्वा-भग्नसेतुसमुद्रवत् सर्वत्र व्याप्रियमाणेन परमभक्तिरूपापन्न ज्ञानेनेश्वरस्वरूपं रूपं गुणान् विभूतिं चाविशेषेणाभि-तोप्यनुभूय तादृशानुभवजनितप्रीतिप्रकर्षेण मधुपानमत्तवद्-क्रमेणस्तोत्रमुखः सन्दर्पितो नृत्यति । सच उन्मत्तकः किंचित्कारकौतुकमुत्पादयति । दास्ये प्रेरयति । तंच-किञ्चित्कारनिरवद्यः परः प्राप्तेरित्युक्त प्रकारेण अनु-भूतस्यांशस्याल्पत्वेन अनुभाव्यांशस्याधिक्येनागत्वेविषय वैलक्षण्ये तच्चसर्वतोव्याप्य वर्तमानेऽभिनिवेशेच वर्द्धयति । तेनक्षुद्रकंटकारोहेण सर्वतो व्याप्यवर्तमानानिकालपरिच्छेद-देशपरिच्छेदअवस्थापरिच्छेदाभावत्वात्सर्वेषु देशेषु सर्वेषु कालेषु सर्वावस्थासु च क्रियमाणानिसर्वविधकैंकर्याणि

प्रार्थितानि । प्रार्थनायां चतुर्थीत्युक्तचतुर्थ्या अपहतपाप्मा विजरोविमृत्युः निर्गुणं निरञ्जनमिति हेयगुणान् प्रतिषिध्य, यः सर्वज्ञः सर्वविदित्यादिनाविलक्षणविलक्षणविग्रहसंभोगगुणयोगंचोक्त्वा, एवं विलक्षणगुणयुक्तं हेयगुणरहितं वस्त्वेवोपास्यमिति । यथा वाउपास्य वस्तु निर्णीतम्, एवं प्राप्यमपिवैलक्षण्यपूर्णम् । हेयगन्धरहितमेव स्यादिति तत्रवैलक्षण्यपूर्तेः पूर्वमुक्तत्वात् । अनन्तरमयं नमः शब्दः हेयगन्धराहित्यं वदति । तत्रभोगे हेयान्वयो भोग्यवस्तुगतदोषेण वा भोक्तृगतदोषेणवास्यात् । तत्रात्रोक्तभोग्यवस्तुनो मङ्गलायतनभूतायाः महालक्ष्म्याश्च मङ्गलकरत्वात्, मङ्गलानां च मङ्गलमित्युक्तप्रकारेण स्वरूपादिभिः सर्वेभ्योऽप्युत्कृष्टत्वाच्च न्यूनता नास्ति । अथभोक्तृदोषएवस्यात् तन्निवर्तयति इदं पदं स च अहंकारममकारौ। ननु स्वरूपयाथात्म्यज्ञानजनकेमूलमन्त्रे अहंकारममकारयो। र्निवृत्तत्वात् इदानीं निवर्त्यावहंकारममकारौ काविितिचेन्न । इमावहंकारममकारौ त्रिविधौ भवतः । अनात्मन्यात्मबुद्धिर्या अस्वेस्वमिति या मतिः । अन्यथा सन्तमात्मानमन्यथाप्रतिपद्यते इत्युक्तप्रकारेणानात्मनिदेहे आत्मबुद्धिःदेहानुबन्धिपदार्थेषु स्वत्वबुद्धिश्चाहंकारममकारौ । तदुपरि स्वतन्त्रोहमितिदेहात्परत्वेनात्मनो ज्ञाने सत्यपि स्वातन्त्र्यप्रतिप-

त्तिश्चाहंकारः। विषयसद्भावे ममताप्यनुवर्तेत । तदुपरि कर्मज्ञानाद्यनुष्ठानं कृत्वा कस्यचित् साधनविशेषस्य वा स्वीकारं कृत्वा अस्याहमनुष्ठाता ममेदमनुष्ठानमिति जायमानावहंकारममकारौ स्तः । एवं त्रिविधावहङ्कारममकारौ प्रथमाक्षरं चरमपदेन तत्रविभक्तिविशेषेणानन्तरपदेन च व्यावर्तितौ । अथत्रिविधेभ्योप्यहङ्कारममकारेभ्यो विलक्षणौ । काकाक्षिन्यायेनैकेनपदविशेषेण व्यावर्तितौ । भोगदशानुवृत्तियोग्यावहंकारममकारौ भवतः । तौ व्यावर्तयत्यत्र तौ-चाहं भोक्ता ममायं भोग इति स्थितिः । ननु अहमन्नादः सोश्नुते सर्वान्कामान्सदापश्यन्ति, भोगमात्रसाम्यलिङ्गात्, अत्रब्रह्मसमश्नुतेइत्युक्तप्रकारेण साक्षाद्गुणादीनां भोक्ता भवति । तदुपरि गुणाद्यनुभवस्य रस्यत्वात् प्रीतोभवति तादृश प्रीत्यागतेकैंकर्यैभोक्तृत्वमस्य नास्तीति, कथं भोक्तृत्वाभावे लब्धानन्दी भवतीत्युक्त मानन्दित्वञ्च स्यात् । आनन्दित्वाभावेऽपुरुषार्थता च स्यात् । कर्मानुष्ठानदशायामकर्तृत्वानुसन्धानं, अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्रपञ्चममित्युक्तप्रकारेण आत्मनश्चैतन्यप्रयुक्तप्रयत्नमात्रमस्ति । अधिष्ठानादीनामेककर्तृत्वमित्युपपन्नम् । मुक्तिदशायांकर्तृत्वारोपेण विषयाणामधिष्ठानादीनामभावेन "कुर्वतः पाणि पादं

तत् मर्व तोऽच्नि शिरोमुखम् । सर्वतः श्रुतिमल्लोकेसर्वमावृत्य तिष्ठतीति" अधिष्ठानादिभिः कर्त्तव्यस्यकार्यस्य स्वरूपेण कतुं शक्तत्त्वात् । प्रज्ञया हि पश्यति मनसैतान् कामान् पश्यन् रमते इत्युक्त प्रकारेणानुभवार्थमात्मधर्मभूतस्य ज्ञानमात्रस्यापेक्षितत्वोक्त्या चानुपपन्नमितिचेन्न । इदानीं तन्नोच्यते । पतिव्रतायाः स्त्रियोभर्तृ संश्लेषसंजनितसारस्यानुभवे सत्यपि भर्तृ मुखविकाशस्यैव प्रयोजनत्त्वात् । भर्तृ-मुखविकाशहेतुरिति संश्लेपादिषु यथा वा संगोजायते, तथा भगवद्गुणानुभवादिषु अहंभोक्ता ममरसइतिपुरुषभोगवत् स्वातन्त्र्येण साधारण्येन वा करणं विना ईश्वरमुखविकाशस्य हेतरिति, तत्रसङ्करणं मुखविकास एवस्वस्यभोग्यइति ज्ञात्वास्थितिश्च । अतएचप्रथममहमन्नं इत्युक्त्वा-अनन्तरमहमन्नादइत्युक्तम् । एवमनेन वाक्यद्वयेनस्वरूपज्ञानानन्तरभाविपदद्वयोक्तोपायोपेयौ प्राथ्यर्ते । एवं पूर्वार्द्धे प्रपद्य इति क्रियापदं अध्यवसायं वदति । तस्योपेयाध्यसायाद् व्यावृत्तिं करोति । उपायवाचकशरणशब्दः तस्योपायस्य, साध्योपायाद् व्यावृत्तिं वदति । नारायण चरणाविति शब्दः तादृश सिद्धसाधनमवलंबतः अवलंबनमार्गं वदति । श्रीमत् पदं प्राप्यदशानुवर्तिनो विरोधिनो निवृत्तिं वदति । नमः शब्दः तस्य प्राप्यस्य कैंकर्यं वदति । चतुर्थी-

तादृशकैंकर्यप्रतिसम्बन्धिनं वदति। नारायणपदं प्रतिसम्बन्धिपूर्तिं वदति। श्रीमते इति पदं एवं कैंकर्यविरोधिनिवृत्ति कैंकर्यं, कैङ्कर्यप्रतिसम्बन्धिनं,प्रतिसम्बन्धिपूर्तिं,तत्प्राप्तुरधिकारिणोविशेषणभूतमध्यवसायं, स च अध्यवसायं उपायाध्यवसाय इत्यमुमर्थं, तस्योपायस्यसिद्धत्वंतादृशसिद्धोपायघटकं पुरुषकारं च वदति। एवं महालक्ष्म्याः पुरुषकारत्वंपुरुषकारभूतायास्तस्याः नित्ययोगः, नित्ययुक्तयाउद्बुद्धशीलादिगुणविशेषाः, तादृशगुणप्रकाशकविलक्षणविग्रहयोगः गुणविग्रहविशिष्टस्योपायभावः। तादृशोपायावलंबिनश्चेतनस्याध्यवसायः। अध्यवसायविशिष्टस्य प्राप्यमेकमिथुनमित्ययमर्थः तादृशप्राप्यत्वस्य दार्ढ्यापादकं स्वामित्वं सर्वस्वामिचरणयोः क्रियमाणं कैङ्कर्यमेवपुरुषार्थ इत्ययमर्थः, तस्य विरोधिनावहंकारममकारानिवृत्तावित्यर्थश्चोक्तः। पेरियवाचांपिल्लैतिरुवडिकलेशरणं॥ सर्वधर्मान् परित्यज्येतिश्लोकेउक्तोधर्मपरित्यागः शास्त्रविरोधात् अनुष्ठानविरोधात् प्रकरणविरोधाच्चायुक्तः। यावज्जीवमग्निहोत्रं जुहुयात्, धर्मेण पापमपनुदति, यज्ञेन दानेन तपसानाशकेन ब्रह्मणाविविदिशन्ति, सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति ज्ञानसाधनत्वेनकर्माण्यवश्यानुष्ठेयानीति श्रूयमाणत्वात्, ब्रह्मविदाप्नोतिपरम्, तमेवंविद्वानमृतइह-

भवति, ब्रह्मवेद्ब्रह्मैव भवति, तदाविद्वान्पुण्यपापे विधूय निरञ्जनः परमंसाम्यमुपैति, अस्ति ब्रह्मेति चेद्वेद, संतमेनं ततो विदुः, विद्यात्तं पुरुषंपरम्, इति वेदनविशेषस्य भगवत्प्राप्तिसाधनत्वेन विहितत्वात्। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्, भक्त्याचधृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यन्तीह हृदा मनीषा मनसाभिक्लृप्त इति प्राप्तिसाधनत्वेन भक्तेर्विधानाच्च एतेषां त्यागः शास्त्रविरुद्धः। शुकोमुक्तो वामदेवो मुक्त इति मुक्तत्वेन श्रुतैः शुकादिभिरुपमानमशेषाणां साधूनामित्युक्तप्रह्लादादिना भरतसौभरिप्रभृतिभिरन्यैर्मुमुक्षुभिश्चाविशेषेण-क्रमज्ञानादीनामनुष्ठितत्वात्, धर्मत्यागविधिः अनुष्ठान विरोधी भवति। नियतं कुरु कर्मत्वं, कर्मज्यायो ह्यकर्मणः, कर्मणैवहि संसिद्धिमास्थिता जनकादयः। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते। नहि ज्ञानेन सदृशं पवित्रमिहविद्यते। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा भोक्तारं यज्ञ तपसां, सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वामां शान्तिमृच्छति। भक्त्या मामभि जानाति, भक्त्या त्वनन्यया शक्यः मद्भक्तिं लभते पराम्। मन्मना भव मद्भक्तइति सविस्तरं सादरञ्च अष्टादशभिरध्यायैरुपदिष्टानां कर्मादीनां त्यागः प्रकरणविरुद्धः। एवं शास्त्रा-

नुष्ठानप्रकरणविरोधापत्त्या अस्यश्लोकस्य शास्त्रानुगुणार्थ- एवार्थः स्यात् । तद्विरुद्धस्त्यागः नार्थ इति केचिद् वदन्ति । शास्त्रविरोधस्यानुष्ठानविरोधस्य प्रकरणविरोध- स्य चाभावात् मत्वर्थो न भवति । यो ब्रह्माणं विदधातिपूर्वं यो वै वेदांश्चप्रहिणोतितस्मै तं ह देवमात्मबुद्धिप्रसादं मुमुक्षु- र्वै शरणमहंप्रपद्ये । तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः, न्यास इति ब्रह्मदेवानां गुहा य एवं वेद ब्रह्मणोमहिमान माप्नोति । तावदार्तिस्तथा वाञ्छा, तावन्मोहस्तथासुखम् , यावन्न यातिशरणं त्वामशेषाघनाशनम् । शरणंयंशरणंयातो- गोविन्दं नावसीदति । वृथैव भवतो याता भूयसीजन्मस- न्ततिः, तस्यामन्यतमं जन्म संचिन्त्यशरणं व्रज । तेषां तु तपसां न्यासमतिरिक्तं तपः श्रुतम् । सादेवेस्मिन्प्रयुज्यतां इतिसर्वधर्मपरित्यागपूर्वकमनुष्ठेयायाः प्रपत्तेर्भगवत्प्राप्तिं प्रति स्वतन्त्रसाधनत्वेन शास्त्रे विहितत्वात् शास्त्रविरोधो नास्ति । ननुकर्मज्ञानादिविधायकशास्त्राणां तत्त्यागपूर्व- कमनुष्ठेयायाः प्रपत्तेर्विधायकस्य शास्त्रस्य चान्योन्यवि- रोधात् प्रपत्तिशास्त्रं दुर्बलमिति चेन्न । शास्त्रत्वाविशेषात् प्रपत्तिविधायकशास्त्रविरोधेन कर्मज्ञानादिविधायकशास्त्रा - णामेवदुर्बलत्वापत्तेः स त्वर्थो न भवति । एवं विरोध कथने श्येनविधेः कामनाविधेर्मोक्षविधेश्चान्योन्यं विरोधो-

वर्तते । ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थधर्मो भिक्षुधर्मश्चेति-एतेषामन्योन्यं विरोधो वर्तते । न हिंस्यात् सर्वाभूतानीति-भूतहिंसां प्रतिषिध्य पशुविशसनस्य विहितत्वात् । यावज्जीवमग्निहोत्रं जुहुयादिति अग्निहोत्रं होमंविधायतत्त्यागस्य संन्यसेत् सर्वकर्माणीति विहितत्वात् कर्मानुष्ठेयमित्युक्त्वा तत्त्यागपूर्वकमनुष्ठेयस्य ज्ञानयोगस्य विधानात् । उपास्य वस्तु यः सर्वज्ञः सर्वविदिति सगुणमुक्त्वा निर्गुणंनिरञ्जनमितिगुणविधुरमित्युक्तत्वाच तत्तत्प्रकारेण आपादचूडं परस्परविरुद्ध एवार्थो भासते । इति शास्त्रमात्रं त्याज्यं स्यात् । तत्तद् विरोधः गुणभेदेन वर्णभेदेनआश्रमपाकभेदेन रुचिभेदेन चाधिकारिभेदजननात् यथापरिह्रियते एवमयमपिविरोधः अधिकारिभेदेन परिहृतः । तस्माच्छास्त्रविरोधो नास्ति । कर्मज्ञानादीनां शुकादिभिर्वकंडुमुचुकुंदप्रभृतिभिर्मुमुक्षुभिर्दुर्वासःशापदूषिताभिर्देवताभिश्च — प्रपत्तेरनुष्ठानात् । तत्र फलितत्वाचानुष्ठानविरोधोनास्ति । कर्मयोगादीनांमहानुष्ठानाभावात् पाकक्रमनिबन्धनाधिकारिभेदेन परिहारवत् अयमपि अधिकारिभेदेनपरिहृतः । तस्मात् प्रकरणविरोधश्च नास्ति । एवमाभासरूपशास्त्रविरोधादिकं परिहर्तुं केचित्पूर्वविहितानि त्रैवर्णिकविषयाणि, इदं च त्यागपूर्वकमङ्गप्रपत्तिविधानमत्रैवर्णिकस्त्री

शूद्रादिविषयमितिविभागमाहुः । अत्रविषयभूतस्यार्जुनस्य त्रैवर्णिकव्यन्यतमत्वात् "स्त्रियोवैश्यास्तथा शूद्रास्तेऽपि यान्तिपरांगतिमिति अत्रैवर्णिकानां स्त्रीशूद्रादीनां भजनाधिकारमस्तीतिश्रुतत्वाच, प्रसज्यप्रतिषेधस्य धर्मानुष्ठानयोगस्थल एव प्राप्तेश्च स चार्थो न भवति। फलपरित्यागपूर्वकमङ्गप्रपत्तिर्विधीयते इति केचित् तन्न । अत्र कर्मयोग प्रस्तावाभावात् । सत्वेऽपि मा फलेषु कदाचन इतिपूर्वमुक्तत्वात् । धर्म शब्दस्य फलवाचित्वाभावाच्च । कृच्छ्रचान्द्रायणकूष्माण्डवैश्वनरादिप्रायश्चित्तधर्मान् विहाय तत्स्थाने मामाश्रयेतिपक्षश्च न । अर्जुनस्य कर्मयोगविरोधिदुष्कृताभावात् । स्वयं याचमानामुर्वशीमपि अनादृत्य वर्तमानत्वेन जितेन्द्रियत्वात् । पूर्वशोकजनकप्रायश्चित्तस्य प्रसक्त्यभावात् । धर्मशब्दस्य तावन्मात्रे संकोचासंभवाच्च । भुक्त्वा चांद्रायणं चरेदितिवत् कर्मयोगादिषु भ्रंशेसति तत्प्रायश्चित्त्वेन प्रपत्तिर्विधीयत इति पक्षश्च न । नेहाभिक्रम नाशोऽस्ति प्रत्यवायो न विद्यते इति प्रायश्चित्तनिरपेक्षत्वेनोक्तत्वात् । ज्ञानयोगलाभाय तत्साधनं कर्म विहाय मामाश्रयेति पक्षश्च न । साध्यज्ञानस्य बाधकशब्दाभावात् , प्रपत्तेः स्वातन्त्र्येण विधानात् । धर्मशब्दस्य कर्ममात्र पर्यवसानसंभवात् । विहितकर्मत्यागरूपदोषप्रसंगाच्च ।

इमं त्यक्त्वापिमामाश्रयेदिति शरणागतिप्रशंसेति पक्षश्च न प्रशंसयाशोकनिवृत्यसंभवात्। पूर्णाहुतिन्यायेनास्य विधिकृतकर्मत्यागे तात्पर्यं नास्ति। प्रपत्यनुष्ठाने तात्पर्यमिति पक्षश्च न। कर्मत्यागं विनानुष्ठानायोग्यायाः प्रपत्तेः फलं विनानुष्ठेयस्य पूर्णाहुतिन्यायस्य दृष्टान्तत्वाभावात्। न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह, रथोपस्थमुपाविशदिति बन्धुत्यागभयेन युद्धान्निवृत्तमर्जुनं युद्धे प्रवर्तयितुं प्रवृत्तत्वात्, प्रबन्धस्य प्राक् सर्वत्र नियतं कुरु कर्मत्व कर्म ज्यायो ह्यकर्मणः। शरीर यात्राऽपि च ते नप्रसिद्धेदकर्मणः। धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते। लोकसंग्रह मेवापिसंपश्यन् कर्तुं मर्हसीति कर्मावश्यंकर्तव्यमित्युक्तत्वात्। अथचेत्त्वमिमंधर्म्यं संग्रामं न करिष्यसि। ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि। ततो युद्धाय युज्यस्व नैवंपापमवाप्स्यसि। इति कर्माननुष्ठाने पापिष्ठो भवतीत्युक्तत्वात्। ये त्वेतदभ्यसूयन्तोनानुतिष्ठन्ति मे मतम्। सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः। इति स्वेनादरेणोपदिष्टस्य कर्मणः सादरमननुष्ठाने नष्टो भवतीतिमोहात्तस्य परित्यागस्तामसः परिकीर्तितइति कर्मस्वरूपत्यागस्य तमः कार्यत्वेनोक्तेश्च। संगं त्यक्त्वा फलं चैव स त्यागः सात्विकोमत इति फलसंगादित्यागएव सात्वि-

कत्याग इति विशिष्योक्तत्वात्। नहि देहभृताशक्यं त्यक्तुं कर्माण्यशेषतः। नियतस्य तु सन्यासः कर्मणो नोपपद्यत इति करणानां कुर्वद्रूपत्वेन कर्मणः साक्षात् त्यक्तुमशक्यत्वात्। त्यागेपञ्चमहायज्ञानामपि त्यागप्रसङ्गेन तत्त्यागे यज्ञशिष्टाशित्वाभावेनाघाशित्वादाहारशुद्धिप्रयुक्तसत्वशु — द्धिविनाशात्, कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमभिति कर्मानुष्ठानस्यैव स्वस्योत्तममतत्वेनोक्तत्वात्। स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तवेति श्लोकश्रवणानन्तरं त्वदभिमतप्रकारं कर्मानुष्ठानं करिष्य इति अर्जुनेन प्रतिवचनोक्तेस्तादृशवचनानुगुणंभारतयुद्धस्यप्रवृत्तत्वात्। मामेव ये प्रपद्यन्ते, तमेव चाद्यं पुरुषं प्रपद्ये, तमेव शरणं गच्छेत्यक्तया विहितप्रपत्तेः प्रधानतयाभिधानासंभवाच्च। दुष्कराणां साधनानां साध्यस्यार्थस्य प्रपत्तिमात्रसाध्यत्वानुपपत्तेः। पूर्वं साधनान्तर दुष्करत्वादिना शोकवेग उत्पन्न इति श्रवणाभावात्। दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेदिति कर्मणोदुष्करत्वादिभिस्त्यागे त्यागफलसिद्धिर्नास्तीत्युक्तत्वात्। विहितार्थानुष्ठाने स्वरूपहानिश्चेत्, विधिनिषेधरूपशास्त्रस्य वैयर्थ्यापत्तेः। शरणंव्रजेतिविधेर्वैयर्थ्यात्। एकपदस्य देवतान्तरव्यावृत्यर्थसिद्धेश्चात्रोक्तस्त्यागः कर्मस्वरूपत्यागो न-

अर्थात । तस्मात् पूर्वोक्तेषु साधनेषु फलसंगादीन् स्वतन्त्रसाधनत्वप्रतिपत्तिं च विहाय तत्तत्साध्यसमाराध्यं मामेव फलप्रसादकमिति जानीहि । तेनप्रीतोऽहं तादृ कर्म विशेषेण प्रतिपत्तिविशेषेण च युक्तं त्वां मत्प्राप्तिविरोधिसकलपापेभ्यो विमुक्तं करिष्यामि । एवं यथा त्वत्सकलविरोधिजातमहं दूरीकरोमि । तथाममप्रसादहेतुकर्मयोगे कर्तव्याकर्तव्य बुद्ध्या शोकं मा कुरु इत्यस्य चरमश्लोकत्वात् पूर्वं शास्त्रेणोक्तमर्थंसर्वं निगमयतीति केचिदाहुः । अत्रोक्तस्त्यागः कर्मस्वरूपत्याग इति स्वीकाराभावादुपक्रमेण तदुक्त्यनुष्ठानाभ्यांच विरोधो नास्ति। अवश्यंकर्तव्यस्याकरणे प्रत्यवायः स्यादिति हेतुद्वयश्च आत्मावलोकनहेतुत्वेन कर्म नानुतिष्ठति चेत् स्ववर्णस्वाश्रमोचितधर्मत्वात् , तवस्वधर्ममपि चात्रेच्येत्युक्तप्रकारेणावश्यं कर्तव्यम् । तदकरणे प्रत्यवायश्च स्यादित्यन्यपरत्वात् परिहृतम् । कर्मज्यायो ह्यकर्मण इत्येतदपि ज्ञानयोगापेक्षयाकर्मयोगप्रशंसापरमिति परिहृतम् । स्वविषयेकर्तृत्वमारोप्य कर्मानुष्ठेयमित्युक्ते तत्र ये केचनासूयां कुर्वन्ति ते नश्यन्ति इत्युक्त्या असूयानिबन्धननाश एवोक्तः, न त्वननुष्ठाननिबन्धनो नाशः । अननुष्ठाननिबन्धनत्वे तस्यकार्यं न विद्यत इति कर्मयोगे निरपेक्षस्य तं त्यजतो ज्ञानयोगाधि-

कारिणो नाशप्रसङ्गेन तदपि परिहृतम्। अनेन न्यायेन कर्मस्वरूपत्यागस्तामस इत्येतदपि मोहात्तस्य परित्याग इति मोहहेतुना त्याग इति विशेषितत्वात् नास्तिकत्व निबन्धनस्त्यागस्तामस इत्युक्त इति परिहृतम्। फलसङ्गादित्यागपूर्वकमनुष्ठाने सात्त्विकत्याग इत्युक्तिरपि नास्तिकव्यावृत्तिपरा। अन्यथा ज्ञानयोगनिष्ठादीनामपि सात्त्विकत्वानापत्तेः। भगवत्प्रीणनकर्मणो निःशेषत्यागस्याभिमतत्वाभावात्। करणानां कुर्वद्रूपत्वेनागतो विरोधश्च नास्ति। त्याज्यं दोषवदित्येक इति रागद्वेषादिवदेतत कर्मात्मनोबंधकमिति वदतां व्यावर्तकत्वात् कर्तव्यानीत्यनेनापि न विरोधः। "सर्वं कर्माखिलंपार्थ ज्ञानेपरिसमाप्यते" इति कर्माङ्गस्य ज्ञानस्य कर्मणोङ्गित्वेन विधानवदङ्गाङ्गिविरोधो नास्ति। "प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै। यानि तेषामशेषाणां श्रीकृष्णानुस्मरणं परमिति" तपः कर्मादि साध्या पापनिवृत्तिः कृष्णानुस्मृतिमात्रेण जायते इत्युक्तत्वात्, प्राबल्यदौर्बल्यविरोधो नास्ति। साधनंकर्म दुष्करत्वादिभयेन त्यक्त्वा तत्साध्ये ज्ञाने आशोकरणेतन्नसिद्ध्यतीत्युक्तत्वान्नैव त्यागफलं लभेदित्यनेनापि विरोधो नास्ति। यथा मुमुक्षोः फलार्थं विहितानां कर्मणां त्यागस्य स्वाधिकारानुरूपत्वात् स्वरूपहानिर्नास्ति।

तथास्यापिस्वाधिकारव्यतिरिक्तविषययोर्विधिनिषेध — योरनुष्ठाने स्वरूपहानिप्रसङ्गेन स्वाधिकाररूपविधिनिषेधशास्त्रयोरनुष्ठानोच्च न विधिनिषेधशास्त्रयोर्वैयर्थ्यम् । "मा शुचः। संपदंदैवी मभिजातोऽसि पाडवे"त्यत्र माशुच इतिशोकनिवृत्तिदर्शनेन दैवासुरविभागश्रवणेन शोको जात इति यथानुमीयते, एवमत्राप्यनुमानाच्छोको अस्तुत इति दोषो नास्ति, अयं च श्लोको न निगमनं भवति, धर्मशब्दस्यधर्मगतस्वातन्त्र्यवाचित्वाभावात् । स्वफलभगवत् प्रीतिं प्रति स्वतन्त्रसाधनत्वात् । कर्मणोऽङ्गभूतं प्रपत्ति-विशेषमुक्त्वा प्रपत्त्यासह कर्मानुष्ठानं कुर्विति वक्तुमौचित्येऽस्याः प्रपत्तेः स्वातन्त्र्येणविधानात ।' 'अहंहि सर्वयज्ञानां भोक्ता च प्रभुरेव चे"तिपूर्वं ममप्रीतिसाधनानिभवन्त्येतानि कर्मादीनि एतेषांफलप्रसादकोऽहमित्युक्तत्वात् । एक पदस्य व्यावृत्यसिद्धेः देवतान्तर व्यावृत्ते र्यान्तिमद्याजिनोऽपि माम । "भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वामां शान्तिमृच्छति । येऽप्यन्यदेवता भक्तास्तेऽपि मामेव कौन्तेययजन्ती" त्येवमादिभिः पूर्वंसाधितत्वात् । नानुशोचितुमर्हसि । नैवशोचितुमर्हसि, न त्वंशोचितुमर्हसीति पूर्वं शोकमाकुर्वित्युक्तत्वात् । यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो ममेत्यध्यात्मविषये त्वद-

भिहितवाक्यैर्मम मोहोगतइति तेनोक्तत्वाच्च निगमने प्रयो-
जनाभावात्, सोप्यर्थो न भवति। तस्मात् "तत्किं कर्म-
णिघोरे मां नियोजयसि केशवे"ति कर्तव्यानुष्ठेयमिति
कैश्चिद्धेतुभिरुक्तावपि कर्माणि घोरत्वप्रतिपत्त्युपपत्तेः।
"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। तस्याहं
निग्रहंमन्ये वायोरिव सुदुष्करमि' ति मननपरिकरभूतस्य
मनसोनियमनमशक्यमितिभीतत्वात्। अप्राप्य योगसं-
सिद्धिंकांगतिं कृष्णगच्छति। कश्चिन्नोभयविभ्रष्टः छिन्ना-
भ्रमिव नश्यतीति योगभ्रष्टोभवति चेदयं नश्यति किमिति
भीतत्वात्। एवमनेन प्रकारेण बहूनां जन्मनामन्ते ज्ञान-
वान् मां प्रपद्यते इति प्रकारेणानेकजन्मसाध्यानां साधना-
न्तराणां दुष्करत्वादिना हेतुना भयानुवृत्तेः। यततो ह्यपि
कौन्तेयपुरुषस्य विपश्चितः। इन्द्रियाणि प्रमाथीनिहरन्ति
प्रसभं मनः इतीन्द्रियजयः कर्तव्य इति यत्नेकृतेऽपि इ-
न्द्रियाणि विषयेषु बलात्कारेणामुमाकर्षन्तीत्युक्तिः दैवी
ह्येषा गुणमयीमम माया दुरत्यया। इति ममलीलोपकरण-
भूतेयं प्रकृतिः स्वयत्नेनलंघितुमशक्येत्युक्तिः, ईश्वरः सर्व
भूतानां हृद्देशेऽर्जुनतिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रा-
रूढानिमाययेतिईश्वराधीने जगति स्वेन किञ्चिदपि न कर्तुं
शक्यमितिचोक्तिः, मत्तः स्मृतिर्ज्ञानमपोहनंचेति ज्ञाना-

पोहनादिकमपि मयेत्युक्तिः, तस्माच्चेतनव्यापारैकसाध्यं न किञ्चिदप्यस्तीत्युक्तिः,तत्तत्परिहारत्वेन,"तानि सर्वाणि संयम्ययुक्त आसीतमत्परः, मा मेव येप्रपद्यन्ते मायामेतां तरन्ति ते, तमेव चाद्यं पुरुषं प्रपद्ये त्, तमेवशरणं गच्छसर्वभावेन भारते"ति स्वचरणयोक्रियमाणायाः प्रपत्ते र्विधानमित्येतेभ्यो हेतुभ्यः प्रपत्तिर्वैलक्षण्यज्ञानोत्पत्ते: सुकरायामस्यां स्थितायांदुष्करत्वादिदोषबहुलेषुदुःसाध्येषु कर्मसु प्रेरयति। अनुष्ठाय समापयितुमपि न शक्यते इत्यस्मिन् शोकाविष्टे सति एवमुक्ते षु साधनेषु यथाऽशोकः स्यात्, तथा पक्वेस्सति च मोक्षसाधनतया पूर्वोक्तानि साधनानि साङ्ग सवासनं च त्यक्त्वा तेषामपि कार्यसमयापेक्षितम्। स्वयं निरपेक्षं निरुपाधिकवात्सल्यादिगुणविशिष्ट मामेव तत्तत्साधनसाध्याया अनिष्टनिवृत्ते रिष्टप्राप्तेश्चोपायत्वेन दृढाध्यवसायं कुरु एतदेव तव कर्तव्यम्। पश्चात्त्वत्स्वीकृत त्वदभिमतसाधनयोग्यज्ञानशक्त्यादिगुणपूर्णोऽहमपि न्यस्तभरं मत्प्राप्तिविरोधिसकलपापान्यपि स्वयमेवविहाय यथा गच्छन्ति तथा कुर्याम्। अत उक्तसाधनदुष्करत्वादिना न शोचितुमर्हसीत्ययमर्थ एव चरमश्लोकस्य चरमतमो भवति। सर्वधर्मानित्यादिस्वीकाराङ्गं त्यागं वक्ष्यन् त्याज्यांशउपादीयते॥ अत्र धर्मशब्दः सामान्येन फलसाधनो-

पायान् वदति । अन्यथा धर्मशब्दस्य धर्मेण पापमपनुद-तीत्यत्रधर्मशब्दवत् क्रियामात्रवाचित्वे ज्ञानयोगादीनां धर्म-त्वंनस्यात् । अथ चोदनालक्षणोऽर्थो धर्मइत्युक्तप्रकारेणस्व साध्यतया विहितकर्मज्ञानादिमात्रवाचकश्च न भवति । कृष्णं धर्मं सनातनमित्युक्तसिद्धधर्मगोचरत्वानुपपत्तेः । तस्मादयं धर्मशब्दोयद्यच्छास्त्रीयंफलसाधनं भवति तत्तद्-वाचको भवति । एवं फलसाधनधर्मश्च धर्मपरधर्मपरम-धर्मभेदात् त्रिविधो भवति । अत्राधर्मव्यावृत्तं स्वर्गादि-क्षुद्रपुरुषार्थसाधनंधर्मः । परधर्मश्च विमोचकत्वात् बंध-काद्विलक्षणं परमपुरुषार्थलक्षणमोक्षसाधनम् । परमधर्मो-नाम धर्मवत् क्षुद्रपुरुषार्थसाधनत्वं परधर्मवच्चेतनसाध्यत्वं च विना सिद्धत्वात् । परमप्रयोजनसाधनत्वाच्च स्वापेक्ष-योत्कृष्टधर्मरहितो भगवद्विषयः । अस्यधर्मशब्दस्यै-तेषां त्रयाणामर्थत्वेऽपीदानीं परधर्मेतात्पर्यम् । एवंसंकोचे किं प्रमाणमिति चेन्न । प्रथमं मुमुक्षुत्व एव क्षुद्रफलसाध-नानांनिवृत्त्यापरमधर्मस्यगोवलीवर्दन्यायेनोपरि स्वीकार्य-त्वेन विशेषितत्वात् । त्याज्यतया परधर्मस्यैवोपादानं कृतम् । अथवा परधर्मस्याङ्गतयाऽन्वितस्य परमधर्म-स्यापि त्याज्यतया सोप्युपादीयते । धर्मानिति बहुवचनेन स्वसाध्यसाधनसमये परस्परनिरपेक्षसाधनसमूहास्तत्तद-

माधारणाः अंगविशेषाश्चोच्यन्ते। कर्मणैव हि संसिद्धि-
मास्थिता जनकादयइति स्वतन्त्र साधनत्वेनोक्तं कर्म, सर्वं
कर्माखिलं पार्थ ज्ञानेपरिसमाप्यते। नहि ज्ञानेन सदृशं
पवित्रमिह विद्यते। ज्ञानाग्निः सर्वकर्माणिभस्मसात् कुरुते
तथेति कर्मसाध्यं ज्ञानम्, उभाभ्यामेव पक्षाभ्यामाकाशे
पक्षिणां गतिः तथैव ज्ञानकर्मभ्यांप्राप्यते पुरुषोत्तमइति
कश्चित् पक्षी स्वपक्षाभ्यां यथाकाशे संचरति, तथा स्वसा-
धिताभ्यां ज्ञानकर्मभ्यांपरमाकाशनिलयं वस्तु प्राप्नोतीति
भगवत्प्राप्तिसाधनत्वेनोक्तः कर्मज्ञानसमुच्चयः। भक्त्या
त्वनन्यया शक्यः स्वकर्मज्ञानवैराग्यसाध्यभक्त्येकगोचर-
इत्युक्तप्रकारेण कर्मज्ञानसहकृताभगवद्प्राप्तिसाधनभूता-
भक्तिः,जन्मकर्म च मे दिव्यमेवं योवेत्ति तत्त्वतः। त्यक्त्वा-
देहं पुनर्जन्म नैतिमामेतिसोर्जुनेतिविरोधिनिवृत्तिपूर्वकभग-
वत्प्राप्तिसाधनभूतमवताररहस्यज्ञानं, एतद् बुद्ध्वाबुद्धिम-
मान् स्यात् कृतकृत्यश्चभारतेत्यभिमतलाभेन, कृतकृत्यं
करोतीत्युक्तपुरुषोत्तमविद्या, देशोऽयं सर्वकामधुगितिसर्व-
कामफलप्रदत्वेनोक्तः पुण्यक्षेत्रवासः, सर्वपापविशुद्धात्मा
याति ब्रह्मसनातनमितिपापविमोचनपूर्वकभगवत्प्राप्तिफल-
कत्वेनोक्तम्, श्रीनामसंकीर्तनादिकं च वर्णाश्रमपाकरुचि-
भेदप्रयुक्ताधिकारिभेदेनात्यन्तभिन्ना आत्मभेदवदसंख्याता-

उपायविशेषाश्चोच्यन्ते ॥ एवंधर्मानिति बहुवचनेन भगवद्-
व्यतिरिक्ताः सकलसाध्यधर्माश्चोक्ताः, एवं बहुवचनेन—
मोक्षसाधनतया प्रधानधर्माउक्ताः । धर्मविशेषणेनसर्वश-
ब्देन त्रैवर्णिकसाधारणाः सन्ध्याहीनोऽशुचिर्नित्यमनर्हः
सर्वकर्मसु । ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणादि-
तियोग्यतापादकाः सन्ध्यावन्दनपञ्चमहायज्ञादय उच्यन्ते ।
ननुप्रधानभूतकर्मादिकथनेनैवैतेषांयोग्यतापादकानांतेषां च"
साध्याभावे महाबाहो साधनैः किं प्रयोजनमितिप्रयोजना-
भावेन स्वतएवनिवृत्तौ सत्यां त्याज्यतया पृथङ्निर्देशकरणे
कोहेतुरिति चेत्. सर्वधर्म बहिष्कृतइति कस्यापि कर्मणोहो
न भवति किमिति शङ्कोदयात् तद्व्यावृत्त्यर्थं पृथङ् निर्देशः
क्रियते । तस्य स्वीकारस्य चैतन्यमात्रमेव ह्यपेक्षितम् ।
अन्यथायोग्यतापादकानामेतेषांसन्ध्यावंदनादीनामपेक्षित—
त्वेन सन्ध्यावंदनादीनामप्यनुष्ठेयतया स्वीकारो न संभ-
वति । तादृशसन्ध्यावंदनादिस्वीकारार्थंयोग्यतापादक—
सन्ध्यावंदनादीनामपेक्षितत्वात् अनपेक्षितम् । अतएव दुरा-
चारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा । तमाश्रयेदा-
दिदेवं श्रद्धयाशरणंयदि । निर्दोषं विद्धि तंजन्तुं प्रभावात्पर-
मात्मनः । इति सर्वाधिकारिणामप्याश्रयणेऽधिकरोतीत्यु-
च्यते । किं चानुष्ठेयस्यस्वीकारस्य कृताधिकारता च स्यात्।

एवमनुष्ठेयस्यस्वीकारस्य सन्ध्यावंदनाद्यपेक्षा नास्तीति ज्ञापयितुं पृथङ् निर्देशः। साधनान्तराणां सर्वेषां त्याज्यत्वे शान्तोदान्तो उपरतस्तितिक्षुः समाहितोभूत्वात्मन्येवात्मानं पश्येदिति साधनान्तरांगत्वेनोक्तानां शमदमाद्यात्मगुणानां सन्ध्यावंदनादिवत् त्याज्यतया सर्वशब्देनोपादानंस्यादिति चेन्न। तेषामात्मगुणत्वेनास्याधिकारिणः संभावितस्वभावत्वेनागतत्वात्, त्याज्य कोट्यांनान्तर्भावः। प्राप्यकोटावेवान्तर्भावः। गुणभूता एतेऽपित्याज्यकोटावन्तर्भवन्ति चेदात्मगुणभूतानां शेषशेषिभावज्ञानादीनामपि त्याज्यता स्यात्। अत्र सर्वशब्देनलोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसीति लोकसंग्रहार्थतयाकर्तव्यान्यपि कर्माणि पुत्रार्थं क्रियमाणपुंसवनादिव्यापाराश्चत्याज्यतयानुसन्धेयाः। तथाहि तस्यकार्यं न विद्यत इत्युक्तप्रकारेण कर्मयोगफलं ज्ञानयोगं प्राप्यानन्तरं तद्साधनकर्मयोगेनिरपेक्षः। कश्चिन्नैरपेक्ष्येण तत्कर्म त्यजति चेत्ज्ञानयोगावलम्बनोपयुक्तपाकरहितः कश्चित, यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते। इतिन्यायेन विलक्षणस्याचार एवास्माकमप्याचार इति अस्याचारं प्रमाणीकृत्य तद्वद् कर्मानुष्ठानान्निवर्तते। ज्ञानयोगानधिकारित्वेन कर्मयोगत्यागाच्च तत्स्थानेनारोहति। तत्साधनस्य कर्म-

योगस्य त्यक्तत्वात् । एवमुभाभ्यां विनोभयभ्रष्टतैव पर्य्य-वस्यति । तन्नाशहेतुरयं ज्ञानाधिकारी अस्यकर्मानुष्ठानेन नश्यन् तन्नाशजनितं पापममुमाश्रित्यास्य ज्ञानयोगस्य प्रतिबन्धकं भवति । तदभावार्थं लोकसंग्रहार्थादिप्रवृत्तौ प्रवर्तते ! सिद्धसाधनमाश्रयतस्तादृशभयाभावात् । अस्या-धिकारिणः स्थितेर्ज्ञानयोगवद्दुरनुष्ठेयत्वाभावाच्च त्याज्यं-भवति । अथानृशंस्यमेवास्याननुष्ठानस्य हेतुर्भवति । एवं सर्वधर्मानितिसाध्यभूतसकलधर्माणामुपादानं कृतम् । अन-न्तरंपरित्यज्येति तत्त्यागप्रकार उच्यते । अत्र त्यागशब्दे-नधर्मस्वरूपत्यागउच्यते, उत्फलादित्याग आहोस्वित् धर्मे उपायबुद्धित्याग इति चेत् । अस्याधिकारिणो यावच्छरीर-पातं कालक्षेपार्थं भगवत्तोपहेतुभूतानां तेपामनुष्ठेयत्वात् धर्मस्वरूपत्यागो न भवति । फलादिः साधकस्यापि त्याज्य इति पूर्वमुक्तत्वात्फलादित्यागश्च नोच्यते । अतोत्र धर्माणामुपायत्वबुद्धित्याग उच्यते । उपायत्वबुद्धित्यागश्च लाभहेतुभगवत्प्रीतेः साधनमिति प्रतिपत्तित्यागः । तस्मात् स्वरूपत्यागप्रयुक्तो दोषः फलादित्यागंवद्र्तीत्यनेनागता पुन-रुक्तिश्च नास्ति । उपायबुद्धित्यागपूर्वकं भोगबुद्ध्यास्याधि-कारिणोऽनुष्ठेयोऽयंधर्मः । फलाभिसन्धिसंयुक्तो ज्योति-ष्टोम एवज्ञानान्तर्गतश्चेत् । "दूरेण ह्यवरं कर्म बुद्धिय-

गादूधनञ्जये''ति प्रकारेण यथा कर्मान्तरंभवति । तथामोक्ष साधनधर्मएव बुद्धिविशेषेणकर्मान्तरं भवति । एवमनुपाय त्वबुद्धियुक्तादस्माद्धर्मादुपायत्वबुद्धियुक्तमोक्षसाधनधर्मस्य - धर्मान्तरत्वात् धर्मस्वरूपत्याग उच्यत इति वाक्यात्. स उपायबुद्ध्यानुतिष्ठति । अयं भोगबुद्ध्यानुतिष्ठति । स विधिप्रेरितोऽनुतिष्ठति । अयंरागप्रेरितोऽनुतिष्ठति । तस्य वर्णाश्रमधर्मो नियमेनानुष्ठेयः । अस्य वर्णाश्रमधर्मानुष्ठानंवा वैष्णवकिञ्चित्कारो वा प्रातिकूल्यनिवृत्तावेवनियमः आनुकूल्येषु किञ्चिदपिस्यात् । अतएवास्मदाचार्याः केचिदमुमनुतिष्ठन्ति, केचिन्नानुतिष्ठन्ति च । तादृशनियमाभावात् साधकोऽक्रूरः साध्यवस्तुसन्निधानेपि स्वकृत्येन्वितत्वात् । अतएवानुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनमिति आनुकूल्यसङ्कल्पवत् प्रातिकूल्यनिवृत्तिश्चसंभावित स्वभावइत्युच्यते । एवं काम्यकर्मवन्मोक्षसाधनधर्मस्यापि अस्यत्याज्यत्वात् सांगस्य तादृशधर्मस्य त्यागः त्यागशब्देनोक्तः । त्यागविशेषणपरिशब्दः परिः साकल्य इत्युक्तप्रकारेण साकल्यवाची भवति । पूर्वं सर्वधर्मानिति त्याज्यधर्मान्सर्वानुपादाय तत्त्यागस्योक्तत्वात् । अस्यसाकल्यशब्दस्यसकलधर्मानपि त्यक्त्वेत्ययमर्थो न भवति । तस्मात्पूर्वंत्याज्यतयाऽग्रहीतोऽवश्यं त्याज्यो यः सोर्थो

भवेत् । ननु नहिंस्यात् सर्वाभूतानि न सुरांपिवेत् न कल-ञ्जं भक्षयेत्, इत्यादिनाउक्तानां निषेधविधीनां पूर्वं त्या-ज्यतयाऽनुक्तत्वात् निषेधविध्यनुष्ठाने स्वपापविमोचनस्य स्वयं प्रवृत्त इति स्वरूपहान्यापत्तेः । अस्याधिकारिणः अवश्यं त्याज्यत्वाच्च स एव साकल्य शब्दार्थः स्यादिति चेन्न । सोर्थोनभवति निषेधत्यागस्य निषिद्धानुष्ठानरूप-त्वात । निषिद्धानुष्ठानफलस्यपापस्येश्वरनिग्रहरूपत्वात । तादृशनिग्रहस्य चास्याधिकारिणोऽपुरुषार्थत्वाच्च निग्रहहेतो-स्त्याज्यत्वाभावेन भगवद्भागवतापचारादीनां त्याज्यता न-स्यात् । पूर्वार्जितपापविमोचनस्य यत्नेकृतेयथा स्वरूप-हानिर्भवति, तथा ज्ञानोत्पत्यनन्तरं निग्रहहेतुष्ववगाहनेऽपि स्वरूपहानिः स्यात् । अस्यनिषिद्धानुष्ठानस्य भगवन्निग्रह-हेतुत्वेनास्याधिकारिणः स्वरूपविरुद्धत्वात् । आश्रयणीय साधनंप्रतिसहकारित्वाभावाच्च, तादृश कर्मादिवदिदमपि त्याज्यं भवति । तस्मात्साकल्यशब्दवाच्या वासना तथा च सवासनत्याग उच्यते । स च लज्जापुरस्सरत्यागः । स्व-रक्षणार्था स्वप्रवृत्तिः स्वरूपहानिरिति ज्ञानेसति अनादि-कालं स्वरूपहानिकरान् प्रवृत्तिविशेषान् खलु उपायत्वेना-हमवेदिषमिति लज्जाजायते । भर्तृभोगः उदरपूरणोपयुक्त-श्चेत् पतिव्रताया यथास्वरूपहानिर्भवति, तथा भगवद्भो-

गरूपप्रवृत्तेः साधनत्वानुसन्धानम्। परित्यज्येतिल्यपा-धर्मत्यागो यदिस्वीकारस्याङ्गं भवति तदाकर्तव्यो नो चेदयुक्तइत्यर्थो ज्ञायते। धर्मं त्यक्त्वास्वीकाराकरणे उभय-भ्रष्टत्वेन नाश एवफलति। अतएव वेदान्तिमुनिभिर्नार-किणां मूर्द्धाभिषिक्तः स्याम्, अथवापरमंपदं मद्धस्तपत्रिका निर्वर्त्यं स्यात्। एवंरूपा ममस्थितिरिति अनुगृहीतम् धर्म त्यागफलस्य पापस्य प्राबल्येन नरकोवास्तव्यभूमिः स्यात्। त्यागपूर्वकं स्वीकृतोपायः फलतिचेत् परमपदं वा-स्तव्यभूमिः स्यादित्यर्थः। एवं ल्यपा वक्ष्यमाणः स्वीका-रस्त्यागाङ्गक इत्युक्तम्। स्वस्वरूपे दृष्टे साधनान्तराणि-त्याज्यानि स्युस्तेषां स्वरूपे दृष्टे च तथैवाश्रयणीयस्योपा-यस्यस्वरूपे दृष्टे च तथैवस्युः। स्वस्वरूपेदृष्टे नमः शब्दो-क्तप्रकारेणस्वरक्षाव्यापारे स्वरूपहानिर्भवति। तथात्यन्त परतन्त्रं भवन्ति तेषां स्वरूपं वहुयत्नसाध्यत्वेन दुष्करम्। जन्मान्तरसहस्रेषुतपोध्यान समाधिभिरितिचिरकालसाध्यं इन्द्रियजयाद्यपेक्षणात्। आदिभरतादीनामपि भ्रंशदर्शनेन च सा पापप्रारब्धकर्मावसानस्यापेक्षितत्वात् विलम्ब्य फलप्रदं भवति। उपायस्वरूपं च नित्यानपायिन्या महा-लक्ष्म्याश्च सहकारित्वासहत्वात्। सणरज्ज्वासह ब्रह्मास्त्र-वत् निरपेक्षं भवति। एवं स्वस्यानन्यसाधनत्वात्, तेषां

दुष्करत्वादिदोषदूषितत्वात्, उपायस्य सहकारिनिरपेक्षत्वाच्च, धर्मत्यागउपायस्वीकाराङ्गंस्यात् । अथत्यागांगकं स्वीकारं वचयन तत्प्रतिसम्बन्धीमामित्युपादीयते ॥ मां तत्रसारथित्वेन स्थितं मां अत्र स्थितात्राश्रयणैकान्तभूताः सौशील्यसौलभ्यवात्सल्यस्वामित्वगुणाः विलक्षणविग्रहयोगश्च प्रकाशन्ते । अवाश्यनादर इत्युक्तप्रकारेण स्वस्यगुणशीकरेषु यथा सूरिसंघा मज्जन्तिस्वयञ्च निस्तरङ्गजलधिवत् स्वानुभवानन्द वैभवेनाविकारो भवति. तथाविध महावैभवयुक्तोऽपि क्षुद्रसंसारिचेतनस्यार्जुनस्य रथं स्थापय मेऽच्युत, अथात् स्नापयेति प्रेरणपूर्वकं कार्यस्वीकार •योग्यः अतिसुलभा भवतीति सौशील्यं प्रकाशते । न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनमिति, यस्यावताररूपाणिसमर्चंति दिवौकसः अपश्यन्तः परंरूपमिति चोक्तप्रकारेणातिशयितज्ञानशक्त्यादियुक्तानां ब्रह्मादीनामपि अविषयभूतं स्वविग्रहं आश्रितानामर्जुनादीनां नेत्रविषयं कृत्वाआश्रयितुं प्रतिकूलानां दुर्योधनादीनां लक्ष्येदृष्टिस्खलनार्थं च एकान्तं स्वविग्रहंदर्शयन् वर्तत इति सौलभ्यं प्रकाशते । धर्मेऽधर्मबुद्धिं कृत्वा युद्धान्निवृत्तस्यार्जुनस्य तादृशदोषमपश्यन् स्वफलत्वेन स्वयमेवहितमुपदिश्य तं व्यावर्तयतीति वात्सल्यं प्रकाशते । अर्जुनस्य नीच-

वृत्तिकरणसमये स्ववैभवोपपत्तिपूर्वकंवैश्वरूपप्रकाशनात् स्वामित्वंप्रकाशते। सेनाधूलिधूसरितस्य विकीर्णस्य श्रीकेशयाशस्य स्वेदविन्दुस्तवकितस्यश्रीमुखमण्डलस्य च आश्रितविरोधिदर्शनजन्यकोपेनरक्तस्य विकसितकमलतडागवत् सर्वत्रतरङ्गितस्य श्रीनयनयुगलस्य कालमेघवन्नीलशीतस्य श्रीविग्रहस्य, तत्परभागभूतस्यधृतश्रीपीताम्बरस्य रथस्याधः स्थापितयोः श्रीचरणयोस्तत्रसमर्पितस्य मंजीरस्योद्धृतस्यकशादण्डस्य धृतस्यप्रग्रहस्य चाश्रयत्वेन स्थितस्यस्थितिज्ञापनात् विलक्षणविग्रहयोगः प्रकाशते। स्वनिकर्षं दृष्ट्वा पश्चान्नागन्तव्यं तस्य सुशीलत्वाद्दुर्लभ इतिपश्चान्नागन्तव्यंसुलभत्वात्, अप्राप्त इति पश्चान्नागन्तव्यं सर्वस्वामित्वात्, आश्रयणस्य शुभाश्रयं किमिति वैकल्यं मा भूत, विलक्षण विग्रहयुक्तत्वात्, अस्यविलक्षणविग्रहयोगस्योक्त्यैवतादृशविग्रहस्यनिरूपकभूतायाः क्षणमात्रमपि न विश्लिपामीति वक्षस्थले वर्तमानायाः महालक्ष्म्याश्चोक्तत्वात्, अस्यपूर्वापराधान् क्षमापयित्वा घटयितुं पुरुषकारयोगश्चोक्तः। सर्वधर्मान् परित्यज्य मामित्युक्त्यातुपायसमुदायंविहायमणिपर्वत आश्रयणीय इतिवदुक्तम्। साधनान्तराणि तुपायसमुदायवत्साध्यानि अन्तरीश्वरसंचाराभावेऽनुपजीव्यानिभवन्ति। तद्वैलक्षण्येनायंविषयस्यसिद्धत्वात्

अद्वितीयत्वाच्च सर्वांशेउपजीव्यो भवति । एकपदं त्वमेवो-
पायभूतोमेभव । त्वामेवशरणं प्राप्य, मामेव ये प्रपद्यन्ते,
तमेवचाद्यं पुरुषं प्रपद्ये, तमेवशरणंगच्छेतिस्वीकार्यवस्तु-
निर्देशानन्तरमवधारणोक्तेः तादृशस्थानप्रमाणेनावधार-
णार्थं भवति । अनेनावधारणेनकिं व्यावर्त्यतइति चेदु-
च्यते । सर्वधर्मान् परित्यज्येति पूर्वं साधनान्तरस्योक्त-
त्वात्, तत् व्यावर्त्यं न भवति । मामित्येकवचनेन "मत्तः
परतरंनान्यत् किञ्चिदस्तिधनञ्जयेति पूर्वं स्वस्य सर्वस्मात
परत्वस्योक्तत्वात्, देवतान्तरव्यावृत्तेरवकाशो नास्ति ।
अतोऽनेनावधारणेन व्रजेतिविहिते स्वीकारेऽङ्गभावोऽमाव-
र्त्यते । अङ्गबुद्ध्युत्पत्तौ कोहेतुरितिचेत्, यदनन्तरं यद्
भवति तत्तस्य कारणंइति न्यायइति ब्रूमः । स्वीकारेण-
विना तस्योपायभावो न जीवति । अतःस्वीकारे अङ्गबुद्-
ध्युत्पत्तियोग्यतास्ति । योग्यतायांसत्यां अङ्गभावःकथं
व्यावर्त्यते इति चेदुच्यते । अङ्गंनाम येनाङ्गिनः किञ्चित्-
कारो भवति । सच किंचित्कारः स्वरूपोपपादकतया वा
उत्पन्नस्वरूपस्य वर्द्धकतया वा वर्द्धितस्य फलप्रदानशक्ति-
मुखेनवा भवति । तत्रभक्तेः साध्यत्वात् उत्पत्त्यपेक्षा
भवति । अतस्तस्या कर्मज्ञानाद्यङ्गापेक्षा च अस्योपायस्य-
सिद्धत्वा नोत्पत्त्यपेक्षा, एकरूपत्वात् न वृद्ध्यपेक्षापरमचे-

तनत्वात् न फलप्रदानेऽन्यापेक्षा । एवं अस्योपायस्याङ्गनिर्वर्त्यांशाभावादयंस्वीकारश्चाङ्ग न भवति । अस्योपायस्य स्वरूपोत्कर्षादिषु अङ्गनिरपेक्षत्वेऽयं सर्वदा कुतो न जीवतीति चेदुच्यते । उपायत्वन्नाम—कस्यचिदधिकारिणोऽनिष्टनिवर्त्तकत्वं इष्टप्रापकत्वञ्चातः तत्राधिकार्यपेक्षितः स्वीकारस्यकिं प्रयोजनमितिचेत, ऐश्वर्यार्थिनः, कैवल्यार्थिनः भगवच्चरणार्थिनः, साधनान्तरानुष्ठातुश्चामुमधिकारिणं व्यावर्त्तयति । भगवल्लाभार्थोऽयं स्वीकारः अतः अरुणयापिङ्गाक्ष्यैकहायन्या सोमंक्रीणाति इत्यत्र अरुणपिंगाक्षत्वादयः सोमक्रयोपयुक्तस्यपशोर्यथापश्वन्तराद् व्यावर्तकविशेषणानि, तथायमपि अस्याधिकारिणो व्यवर्तकविशेषणं भवति । अंगतयोपायत्वस्वीकारे त्वमेवोपायभूतोमे भवेति प्रार्थना मतिः शरणागतिरिति । तस्यनिरतेच्छोपायत्व स्वीकारः प्रपत्तिरितिलक्षणवाक्येन विरोधः स्यात् । तस्मात् ईश्वरेणकार्यकरणेऽयमाभिमुख्यसूचको भवति । शरणं शब्दःउपाये गृहरक्षित्रोः शब्दः शरणमित्ययंवर्तते साम्प्रतं चैष उपायार्थैकवाचक इत्युक्तप्रकारेण अत्रोपायार्थवाचको भवतीति सौशील्यादिविशिष्टत्वेनोक्तस्यवस्तुनः" सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपाश्चिता, सदापश्यन्ति, श्रिया सार्द्धमास्ते इत्युक्तप्रकारेणोपेयभावेऽप्यन्वय सद्भावात्तद्-

व्यावृत्तिपूर्वकमुपायभावं वदति । पूर्वं सर्वधर्मान् परित्य-ज्येत्यत्र प्रस्तुतः साधनान्तरत्यागः अस्योपायभावे संकोच को न भवति किमिति चेत् । अर्थसिद्धयपेक्षायाः शास्त्र-सिद्धरेवग्राह्यता "एतं हवाव नतपति किमहंसाधु नाकरवम् किमहं पापमकरवमितीति तस्यकार्यं न विद्यते, क्षेत्रज्ञः करणी ज्ञानं करणन्तस्य तेन तत् । निष्पाद्यं मुक्तिकार्यं वै कृतकृत्यं निवर्तयेदिति चोक्तप्रकारेण नदीकूलप्राप्त्यन-न्तरं तन्निस्तरणपरिकरभूतस्य प्लवस्य यथापेक्षानास्ति । तथामाध्यामावे महाबाहो साधनैः किं प्रयोजनमितिमाध्य-सिद्धयनन्तरं साधनस्यापेक्षामात्रात् । साधनत्यागस्यप्रा-प्त्यांशोऽप्यन्वयसंभवात् उपायत्वे संकोचो न भवति । व्रजे-त्यनेन महाविश्वासपूर्वकः प्रार्थनागर्भः अध्यवसायात्मकः उपायशरीरान्वयरहितः अधिकारिविशेषणभूतः पूर्वोक्त-त्यागाङ्गकः मामित्युक्तवस्तु विषयिकः प्रपद्य इति क्रियाप-दोक्तः स्वीकारो विधीयते । व्रजगताविति धातोर्निष्पन्न-त्वाद्गत्यर्थकः करणेषु अन्यतमस्य करणस्यगतिमात्रमु-क्त्वाभगवद् वैभवप्रकाशको भवति । अथवा त्रयाणां करणानां गतिमुक्त्वा पूर्णप्रपत्तिबोधको भवति । एवंधर्म-त्यागः स्वीकारस्यांग त्यागविशिष्टः स्वीकारः अधिकारि-विशेषणं स्वीकारविशिष्टस्याधिकारिणो वात्सल्यादि गुण-

विशिष्टं वस्तूपायः स्यात्। एवं पूर्वार्द्धेनाधिकारिकृत्यांश उक्तः। अनन्तरमुत्तरार्द्धेनउपायस्य कृत्यांशः अधिकारिणः कृत्यांशस्यलेशश्चोच्यते। अत्राहं शब्दो व्रजेत्यत्रार्थादुक्तस्याधिकारिणो महाविश्वासहेतुभूतानुपरिवक्ष्यमाणस्य पापविमोचनस्य परिकरभूतान् ज्ञानशक्त्यादिगुणविशेषान् पूर्वंमामितिआश्रयणीयत्वेनोक्तस्य वस्तुनः प्रकाशयति। आश्रयितुं वात्सल्यादयोऽपेक्षिताः,कार्यं कर्तुं ज्ञान शक्त्यादयोऽपेक्षिताः, अयं निवर्त्यांशः,अयं निवर्तनप्रकारः अयं निवर्तनाधिकारीति ज्ञातुं सर्वज्ञत्वमपेक्षितम्। ज्ञानेसत्यपिप्रयोजन नास्ति, अशक्तत्वेनपंगुकल्पतया स्थितौ अतोज्ञानानुगुणं कार्यं कर्तुं सर्वशक्तित्वमपेक्षितम्। सर्वशक्तित्वेऽपि तत्समर्पितामुपदां स्वीकृत्यैवपूर्णता यथास्यात्तथाऽपूर्णत्वेतदनुगुणमनेनदातव्यस्य पदार्थस्याभावेनतद्द्वयमप्यकिंचित् करं भवति। अतोऽवाप्तसमस्तकामत्वमपेक्षितम्। सर्वज्ञत्वे सर्वशक्तित्वेऽवाप्त समस्तकामत्वे सत्यपिअनेन चेतनेन सम्बन्धविशेषाभावेन तत्त्रितय मपि कार्यकरं भवति। अतः सर्वस्वामित्वमपेक्षितम्। एतेषां चतुर्णां विपरीतफलत्वं विनास्यरक्षणोपयोगित्वार्थं परदुःखासहिष्णुत्वरूपपरमदयालुत्वमपेक्षितम्। तदभावेसर्वज्ञत्वं अनेनकृतापराधान् ज्ञातुमुपयुक्तं भवति। सर्वशक्तित्वं तत्तदप-

रायानुगुणं नरकादिषु निपात्य पृथक्पृथगनुभवं कारयितु-मुपयुक्तं भवति । अवाप्तसमस्तकामत्व, एवं कृतेएतदु-चितं नभवतीति वक्तुं नियामकाभावोपयुक्तं भवति । सर्वस्वामित्वप्रयुक्तं निरंकुशस्वातन्त्र्यं ततः सर्वज्ञत्वं-रक्षणविषयं कर्तुं सर्वशक्तित्वं रक्षणव्यापारविषयं कर्तुं अवाप्तसमस्तकामत्वं प्रयोजननिरपेक्षं रक्षणोपयोगि कर्तुं सर्वस्वामित्वं स्वफलत्वेनकार्यंकरणोपयोगिकर्तुं चदपे-क्षिता । तस्मात् कार्यंकरणोपयुक्ता एते पञ्चगुणाश्चाहं-शब्देऽनुसन्धेयाः । एवंसर्वज्ञः सर्वशक्तिरवाप्तसमस्त कामः सर्वस्वामी परमदयालुरहमित्युक्तम् । त्वा अज्ञमशक्तं अप्राप्तं महाविश्वासपूर्वकंमयि न्यस्तभरं त्वामिति अधि-काप्युच्यते । अहंशब्देनपापशत्रुस्त्वेति पापाश्रयश्चोक्तः । अनन्तरं सर्वपापेभ्यः इति निरस्यानां पापानां स्वरूपमु-च्यते । तत्र पाप शब्देन भगवत्प्राप्तिविरोध्युच्यते । यः कश्चिदपि अभिमतविरोधिखलुपापम् । पापेभ्यः इति बहु-वचनेन पापानां बाहुल्यमुच्यते । तच्च ज्ञानाभावरूपं, अन्य-थाज्ञानरूपम् , विपरीतज्ञानरूपम्, चेतित्रिविधिमज्ञानंपुण्य पापरूपाणि पातकातिपातकमहापातकोपपातकप्रभृति भेदै-र्नानाविधानि । पूर्वाधोत्तराघरूपाणिकर्माणिदेवतिर्यङ्म-नुष्यस्थावरात्मकचतुर्विधशरीरसम्बन्धः । अज्ञानवासना-

कर्मवासना प्रकृतिसम्बन्धवासना चेत्युक्तावासना विषय-भेदेन विविधभेदभिन्ना रुचिश्चैतन्मूलोत्पत्तिका एतदुद्बोधकाश्चरागद्वेषादयश्च। एवं पापेभ्य इति साधकस्यापि सा-धारणयेननिवर्तनीयानि पापान्युक्तानि। सर्वशब्देनास्या-धिकारिणोविशिष्ट निवर्तनीयं पापमुच्यते। तत्र भोगेन तु इतरेक्षपयित्वाथ संपद्यते इत्युक्त प्रकारेण पूर्वोत्तराघव्यतिरिक्तं प्रारब्धकार्यं पुण्यपापरूपं कर्मसाधकस्यानुभव विनाश्यंभवति। तत्रास्य शरीरारम्भककर्मव्यतिरिक्तः कर्म-शेषोनिवर्त्यकोटावन्तर्भवति। ज्ञानोत्पत्त्यनन्तरं वासनाबलेनबुद्धिपूर्वकं कृतस्यपापस्य सद्भावेऽपि तच्चसर्वशब्दवाच्यं भवति। अनुकूलवृत्तिषु साधनत्वबुद्ध्युत्पत्तौ तच्च सर्व-शब्दवाच्यं भवति। पुत्रादिषु क्रियमाणानि पुंसवनादीनि आनृशंस्यप्रेरितेन कर्तव्यानिपापभयप्रेरितेन कृतानि चेत्ता-न्यपिसर्वशब्दवाच्यानि। सर्व पापेभ्यो मोक्षयिष्यामि एता-दृशेभ्यः पापेभ्यो मोक्षयिष्यामि। अनेनगिचा बहुकालं त्वामाश्रित्यापरित्यज्य वर्तमानानि पापानि यथा स्वयमे-वास्माकमयमाश्रयो न भवति. इति त्वां त्यक्त्वागच्छेयु-स्तथाकुर्याम्। बहुकालमारभ्य पापदर्शनेनतव यद्भयमुत्प-न्नम्, तद्भयंत्वदर्शनेनतेषां यथा जायते तथा कुर्याम्। पूर्वश्लोकेभामेवैष्यसीतिप्रस्तुतस्य भगवत्प्राप्ति प्रति कस्य-

न्तिसाधनविशेषस्यविधानात् , अत्रोक्तं पापविमोचनं भग वत्प्राप्ति विरोधि पापविमोचनं भवति । तस्मात्तथाहेयगु- णध्वंसाद्वबोधादयोगुणाः प्रकाश्यन्ते, न जन्यन्ते । नित्या एवात्मनो हिते, इत्युक्तप्रकारेणमलयोगेन निस्तेजस्कमा- णिक्येमलनिवृत्तयेऽर्पिते सति स्वत एवतद्गततेजो यथा प्रकाशते । तद्वत् अविद्यादि तिरोधानानां निवृत्तत्वात् स्वाश्रयापहतपाप्मत्वादयः सर्वेऽपिस्वतएवप्रकाशन्ते । तस्मा दपेक्षिताविरोधिनिवृत्तिः । तादृशप्राधान्यद्योतनार्थं विरो- धिनिवृत्तिरुच्यते । अतएवाविःस्युमंमसहज कैंकर्यविधय- इति श्रीभट्टार्यै रनुगृहीतम् । एवमहमि त्युक्तस्योपायस्य कार्यमुक्तम् । अनन्तरं त्वेति निर्दिष्टस्याधिकारिणः कृत्य- मुच्यते । मा शुच इति निरपायोपायभूतोऽहं तवविरोधि- निवृत्तिपूर्वकमभिमतं साधयितुमुद्युक्तः अनन्तरं सापाय- साधनान्तर दुष्करत्वाद्यनुसंधानेन शोकं मा प्राप्नुयाः । तादृशसाधनविशेषान् विनानिरपायोपायांभावे हि तवशोकः कार्यः । तांस्त्यक्त्वा मामाश्रयतः शोको माभूत् आश्रय- णीयस्य मम वत्सलत्वात् त्वद्दोषं दृष्ट्वा शोकं मा कुरु सुलभत्वात् दुर्लभ इति शोकं मा कुरु, सुशीलत्वात् त्वदप- कर्षं दृष्ट्वा शोकं मा कुरु स्वामित्वात्, अप्राप्त इति शोकं मा कुरु सर्वज्ञत्वात् । त्वदज्ञानं दृष्ट्वा शोकं मा कुरु सर्व-

शक्तित्वाद् । त्वदशक्ति दृष्ट्वा शोकं मा कुरु अवाप्तसमस्तकामत्वात् । त्वदपूर्तिं दृष्ट्वा शोकंमाकुरु, निरुपाधिकबन्धुत्वात् । परमदयाक्त्वात्-कार्यं कुर्याद्व वा नवेति शोकं मा कुरु। सर्वपापविमोचकत्वात् शोकोन कार्यः । त्वयि दृष्टेऽपि शोको न कार्यः । मयि दृष्टेऽपि शोको न कार्यः विरोधिषु दृष्टेष्वपिशोको न कार्यः । त्वया मयिसर्वभरन्यासस्य कृतत्वात् । त्वयिदृष्टेशोको न कार्यः मम सार्वज्ञादि विशिष्टत्वात् मयिदृष्टेऽपिशोको न कार्यः विरोधिनांममनिग्रहानुग्रहरूपत्वेन चांतमित्युक्ते निवृत्तत्वात् । विरोधिषु दृष्टेष्वपि शोको न कार्यः । त्वय्याप्येवं मयिन्यस्तभरेसति विरोधिष्वपिस्वल्पेपुसत्सु शोकानुवृत्तौत्वमपि ममयथा नाभवः, अहमपि यथा तव नाभवम् । तथा त्वां न नमेयमिति कृत्वा मामपि क्षिपामि नक्षमामिइति कृत्वा मूर्द्धाभिषिक्तो सति शोकं विनानादिकालं गजकुंभस्थितमिवस्थित मेतदज्ञानमिव स्यात् । किं वहुना मयि त्वत्कार्यं निर्वाहके सति त्वं शोचसिचेत्, त्वत् कार्यस्य त्वमेव निर्वाहकः स्यात् । एवंस्वीकाराङ्गतयात्याज्याः धर्मविशेषास्तेषां धर्माणां त्यागप्रकारः तादृशधर्मत्यागपूर्वकमाश्रयणीयस्य वस्तुनः सौशील्यादि गुणायोगः । तद्गुणविशिष्टस्य वस्तुनः सहायासहत्वलक्षणं निरपेक्षवस्तुन उपाय-

भावः तस्योपायत्वेन स्वीकारः । स्वीकृतस्योपायस्य ज्ञान-शक्त्यादिगुणयोग एतद्गुणविशिष्टे वस्तुनि न्यस्तभरोऽधिकारी । तस्याधिकारिणो विरोधिपाप समूहः । पापविमोचन प्रकारः पापविमोचकमाश्रयतोधिकारिणो नैर्भर्यं चोक्तमासीत् । आच्चांपिल्लैतिरुवडिकलेशरणम् ।

विद्याज्ञानसुवृत्तमङ्गलगुणैः पूर्णस्य गोप्तुस्सताम् ।
पादाब्जे सुतरां निविष्टहृदयं वानाद्रियोगीशितुः ॥
वेदान्तद्वयपारगं शुभगुणैर्जुष्टं सुशीलान्वितम् ।
वन्दे लक्ष्मणयोगि वर्यममलं वानाचलेशप्रियम् ॥
श्रीवानशैलमुनिवर्यं कटाक्षलब्ध,
वेदान्तयुग्मविशदीकरणप्रवीणम् ।
श्रीरङ्गराज पदपङ्कजभृङ्गराजं,
रामानुजंयतिवरं गुरुमाश्रयामि ॥

इति द्रविडभाषायां श्रीआच्चां पिल्लैस्वामि कृतस्थ परन्द-रहस्यस्य श्रीरङ्गदेशिकस्वामिप्रसादितः प्रति-पदसंस्कृतानुवादः समाप्तः ।

शुद्धि-पत्र

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
५	८	भाबात्	भावात्
६	१८	विश्वं	विश्व
७	१८	बृंहणार्थ	बृंहणार्थं
८	२	अनादरणायता	अनादरणीयता
८	१४	नाराणेति	नारायणेति
६	६	प्रतिवंध	प्रतिबंध
११	६	पात्रावत्	पात्रवत
११	६	ततमानः	वर्तमानः
१२	१७	वेदाद्ा	वेदादौ
१३	२	उक्तत्वाद	उक्तृत्वाद्
१३	१६	वे	वै
१५	१०	हेतः	हेतुः
१५	११	यक्तिवत्	व्यक्तिवत्
१५	१६	सा	सर्वं
१५	२०	प्रामाणिकं	प्रमाणं
१६	१	चतुथ्यन्तो	चतुर्थ्यन्तो
१६	५	भगवत	भगवत
१६	५	एवाहं	एवाहं
१६	११	वासुदेबस्य	वासुदेवस्य
१६	१३	शेषित्वस्य	शेषित्वस्य
१६	१३	शेषत्वस्य	शेषत्वस्य

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
१५	१८	शेपत्व	शेषत्व
१६	२०	अभाचे	अभावे
१७	११	ईस्वरस्य	ईश्वरस्य
१८	१३	मनुप्यजाः	मनुष्यजाः
१८	२०	दृष्टः	दृष्टेः
१९	२	संप्रतिषन्नम्	संप्रतिपन्नम्
१९	६	भवति	भवति
२०	१४	एत्र	एव
२१	१०	वस्त	वस्तु
२२	२	शेपव	शेषत्व
२२	७	पसे	यज्ञे
२२	११	मध्थम	मध्यम
२२	१८	तपोः	तयोः
२३	१८	महेश्वरः	महेश्वरः
२५	१५	सदृश	सदृशं
२६	४	वैष्णत्राः	वैष्णवाः
२७	१२	गच्छध्वमेनं	गच्छध्वमेनं
२८	२०	विप्रहाः	विग्रहाः
२९	१	पुष्यदर्पित	पुष्पवदर्पित
३०	१	अयुतांरशे	अयुतांशे
३०	५	पनं	व्यापनं
००	११	अनुपपत्था	अनुपपत्त्या
३०	१८	गुणात्मकंक	गुणात्मकत्व

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
३२	१०	भुक्तम्	मुक्तम्
३३	१३	व्राह्मणे	ब्राह्मणो
३४	८	मूतांश	भूतांश
३५	१३	निरवधिक	निरवधिक
३५	५	उत्कृष्टत्वेनोक्ता	उत्कृष्टत्वेनोक्त
३५	८	सर्वोत्कृत्वेन	सर्वोत्कृष्टत्वेन
३५	१६	सहस्त्रेभ्यो	सहस्रेभ्यो
३६	१०	क्षीणापायो	क्षीणपापो
३६	११	रुचि	रुचिः
३६	१६	ज्योष्टामेन	ज्योतिष्टोमेन
३७	४	दुःखाना	दुःखानां
३८	१९	श्रथते	श्रयते
३९	४	त्रिष्णेः	विष्णोः
३९	९	सम्वन्थ	सम्बन्ध
३९	९	पुरुषकारा	पुरुषकार
३९	१५	रात्रो	रात्रौ
४०	८	भवकाशो	मवकाशो
४१	९	हृदये	हृदये
४१	१०	टितुम्	घटितुम्
४१	१३	जनकालजा	जनकात्मजा
४१	१९	विषयी	विषयो
४१	२०	नारित	नास्ति
४२	१०	तत्व	तत्वं

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
४२	२०	मुक्त	युक्त
४३	५	पदङ्कुर	तदङ्कुर
४३	७	मुषयुक्त	मुपयुक्त
४३	८	नित्थ	नित्य
४३	१५	सारूप्य ं	सारूप्यं
४३	१७	निरूपकां	निरूपकं
४५	२	नित्यानपायिनात्वेन	नित्यानपायिनीत्वेन
४६	१	उपयोगिप्याभावात्	उपयोगित्वाभावात्
४६	१२	मुखन	मुखेन
४६	१४	कलप्रसाद	फलप्रसाद
४६	१८	ग्रतिपाद्यानां	प्रतिपाद्यानां
४७	६	तमिश्च	तस्मिश्च
४७	१०	अवर्जनतया	अवर्जनीयतया
४७	१२	स्वारूपाश्रय	स्वरूपाश्रय
४७	१७	भगांभा वाच्च	भङ्गाभावाच्च
४८	१	स्थितत्वात	स्थितत्वात्
५३	३	तिप्यन्त्विति	तिष्ठन्त्विति
५३	२०	पद	पदं
५४	१	नात्रे	पात्रे
५७	१	थवंन्त	भवन्तं
५८	६	ज्ञानादिरिधिकृत	ज्ञानादिरधिकृत
५६	७	पपर्याप्ता	पर्याप्ता
५६	८	उपसनात्मक	उपासनात्मक

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
५६	१२	निर्दोशौ	निर्देशो
५६	१३	कललाभ	फललाभ
५६	१७	प्रतन्नाय	प्रपन्नाय
५६	१७	करशैः	कूरशैः
६०	६	प्रोर्थमा	प्रार्थना
६०	१२	परिहारयाः	परिहारयोः
६०	१६	कि	किं
६१	३	पूर्वाद्धस्य	पूर्वार्द्धस्य
६३	१७	लद्म्मा	लक्ष्म्या
६३	१८	भाभिनि	भामिनि
६५	१	श्रामत	श्रीमत
६५	१७	परिच्छिनात्वात्	अपरिच्छिन्नत्वात्
६६	६	सेव्य	ऽसेव्य
६६	१५	समायीन	समीचीन
६७	१०	इथं	इयं
६८	२	सत्तरार्द्धस्य	उत्तरार्द्धस्य
६८	६	प्राथना	प्रार्थना
७०	८	वतते	वर्तते
७२	१४	त	तं
७७	१६	वे	सवे
८०	२०	संभवात्	असंभवात्
८५	१८	माधि	साधि
८६	४	कैश्चिद्	कैश्चिद्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध पाठ
८७	७	स्थिनायां	स्थितायां
८५	१५	कि	किं
८८		एव	मेव
८८	१७	न्याज्य	त्याज्य
९०	१०	कार्णो	कर्मणो
९२	१	योगस्प	योगस्य
९२	३	नष्टन्वात्	नष्टत्वात्
९५	८	स्वीकतापाय:	स्वोकृतोपाय:
९६	३	घीमा	धिनंमा
९६	७	चल	जल
९७	२	केशया	कशपा
९७	६	वृत	धृत
९८	१०	त्र्याव	व्याव
९८	१५	वत्यते	वर्त्यते
९९	२	अङ्ग	अङ्गं
९९	३	पोत्हत्या	पोत्पत्या
९९	९	पोमं	सोमं
९९	११	व्यवर्तक	व्यावर्तक
९९	१३	निरतेक्षो	निरपेक्षो
१००	५	जान	ज्ञान
१०२	२	कागत्व	कामत्वं
१०२	६	कर्त	कर्तुं
१०२	१५	क्राश्चद	कश्चिद
१०४	१०	भटार्यैः	भट्टार्यैः

"श्री सोमानी ट्रस्ट" से प्रकाशित ग्रन्थ

१—श्री रंग मन्दिर वृन्दावन का संक्षिप्त इतिहास
२—यतिराजवैभवम् रामानुजातिमानुषस्तव हिन्दी
३—श्रीअयोध्या दिव्यदेश मंदिर के स्वामीजी का जी
४—अष्टोत्तरशतनामावलि एवं संक्षिप्त भगवदाराधन
५—सुप्रभातानि
६—आलवंदारादिपञ्चस्तोत्राणि
७—निगमनपडि अर्थपञ्चकादि
८—अर्थपञ्चकादि पञ्चरहस्य हिन्दी टीका
९—श्री वेङ्कटेश मन्दिर बम्बई का संक्षिप्त इतिहास
१०—गद्यत्रय मूल
११—वार्तामाला हिन्दी
१२—स्तोत्ररत्न एवं चतुःश्लोकी हिन्दी व्याख्या सहित
१३—प्रपन्नसार संग्रह
१४—ग्रन्थत्रयम् अष्टश्लोकी गद्यत्रयादि
१५—श्रीवैष्णवमणिप्रदीप
१६—गद्यत्रय-गद्यभाव प्रकाशिका हिन्दी टीका
१७—उपदेश रत्नमाला हिन्दी टीका सहित
१८—स्तोत्रमणिमाला
१९—स्तोत्रपंचकम् श्रीमुकुन्दमालादि हिन्दी टीका सहित
२०—पद्मपुराण उत्तरखण्ड में श्रीवैष्णवों का प्रकरण
(हिन्दी टीका सहित)

विद्यालय प्रेस, वृन्दावन ।